॥ ओ३म् ॥

सिंहः शिशुरपि
निपतति मदमलिनक-
पोलभित्तिपु
गजेषु।
प्रकृतिरियं
सत्त्वयतां
न खलु वयस्तेजसो
हेतुः॥ ३८॥

(नीतिशतकम्)

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26

सत्यनिष्ठा जयेल्लेखनी निर्भया

Posting Date.:
4-5, 19-20 of Every Month

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१

ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥

जातिर्यातु रसातलं
गुणगणस्तस्याप्यधो गच्छता.
च्छीलं शैलतटात्पतत्यभिजनः
संदघतां पहिना ।
शीय चौरिणि पत्रमाणु
निपतत्वोंऽस्तु नः केवलं येनकेन
घिना गुणास्तृणलयमायाः
समस्ता इमे ॥३९॥

(नीतिशतकम्)

卐 वर्षम्-१३ 卐 अंकः-२३ (३११) नवदेहली 卐 १ जूनमासः २०२४तः १५ जूनमासः २०२४ पर्यन्तम् 卐 विक्रमसंवत्-२०८१ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२४ 卐 पृष्ठम्-८


## हिमालयः देवतात्मा अस्ति तथा संस्कृतं भारतस्य आत्मा - कुलपतिः प्रो.वरखेड़ी

देहली, (अजयकुमारमिश्रः)

केन्द्रीयसंस्कृतविश्वविद्यालय, देहल्याः कुलपतिः प्रो.श्रीनिवासवरखेड़ी हिमालयन-चन्द्रखानी पासट्रेक, कुल्लू, हिमालयस्य छात्राणाम् अभिनन्दनं कृत्वा उक्तवान् यत् हिमालयः देवतात्मा अस्ति तथा संस्कृतं भारतस्य आत्मास्ति । तेनोक्तं यत् यथा हिमालयः प्राचीनकालात् एव भारतस्य रक्षां कुर्वन् आगतः अस्ति तथैव संस्कृतमपि भारतीयसंस्कृतेः रक्षां कर्वत् आगता अस्ति। कुलपतेः मान्यता आसीत् यत् इदं गौरवमयं



,शौर्ययुक्तं तथा साहसिकं पर्वतारोहनणं केवलं केषाञ्चित् छात्राणां यात्रा एव न अस्ति, अपितु अस्य प्रत्येकस्य प्रतिभागीनां परिवाराणाम्, संबंधीनाम् ,मित्राणां तथा परिजनानां सहभागितायाः प्रतीकम् अस्ति। सः अस्मिन् उपलक्ष्ये आयोजिते उत्साहपूर्णवातावरणे एतम् अपि संदेशं दत्तवान् यत् यथा अस्माकं दिव्यः तथा भव्यः हिमालयः नदीनाम् , प्रकृतीनाम् तथा अन्येषां प्राकृतिकसंसाधनां रक्षां करोति , तस्य संदेशः संस्कृतस्य छात्रैः विशेषतया स्वकीयेषु परिसरेषु , महाविद्यालयेषु , समाजे तथा मित्राणां मध्ये च प्रेष्टव्यः, येन कारणेन पर्यावरणस्य संतुलनस्य संदेशः महत्त्वञ्च जनानां मध्ये गच्छेत् ।


कुलपतिः प्रो.वरखेड़ी अस्मिन् अभियाने गणप्रमुखः श्री ए.एन . विजेन्द्ररावः, मैसूरस्य प्रो. मदनमोहनझा, डीन, छात्रकल्याण तथा इस कार्यक्रमे युक्ताः अधिकारीणां तथा कर्मयोगीनाम् अपि

शेषभागः अष्टमपुटे

## विद्वद्विभूतीनां डॉ.विन्ध्येश्वर पाण्डेयानां (पं. विष्वक्सेनाचार्याणाम्) भव्यवैकुण्ठोत्सवः समाचरितः

-ऋषिकुमारतिवारी

वृंदावनम् । भारतवर्षस्य लब्धप्रतिष्ठविद्वांसः अनेकेषां शास्त्राणाम् अध्येतघ्णां क्लिष्टान् प्रश्नान् गूढत्वञ्च सरलतया उद्भासितुं समर्थ्यानाम् अद्वितीयविलक्षण प्रतिभायाः धनिनां पं. विष्वक्सेनाचार्याणां वैकुण्ठोत्सवः 24 तः 26 मई 2024 पर्यंतं श्रीधामवृंदावने आयोजितः। गुरवः न्याय-व्याकरण-साहित्य-ज्योतिष इत्येतेषु चतुर्षु विषयेषु आचार्यस्य उपाधिम् अतिरिच्य विद्यावारिध्येति उपाधिम् अपि प्राप्तवन्तः। गुरवः







झारखण्डराज्ये गुमलाजिलान्तर्गतं कुलकुप्पी ग्रामस्य शाकद्विपीयकुले जन्मं लब्ध्वा स्वज्ञानेन तपश्चर्यया च समस्तभारतवर्षे भारतीयशास्त्राणां ध्वजां उत्तोलितवन्तः। गुरुणां जन्मं 24 नवम्बर 1930तमे वर्षे तथा

शेषभागः द्वितीयेपुटे

## वैदिकवाङ्मयेषु निहिताः वैज्ञानिकसिद्धान्ताः -प्रोफेसर मनोजमिश्रः

वार्ताप्रेषकः- डॉ. मूलचन्द्र-शुक्लः

रामनगरम्। वैदिकवाङ्मयेषु वैज्ञानिकसिद्धान्ताः निहिताः वरीवृत्यन्ते। इयं वार्ता मुख्यवक्तारूपेण प्रोफेसर मनोज-मिश्र-महोदयेन गुरूदिवसव्याख्यानमालायामुच्यते।पीएनजी राजकीय-स्नातकोत्तर-महाविद्यालय-रामनगरस्य कैरियर- काउंसलिंग-प्रकोष्ठद्वारा सञ्चालितायाः व्याख्यानमालायाः चतुर्दशं




व्याख्यानं संस्कृतविभागद्वारा समायोजितम्। व्याख्यानविषयः 'वैदिक-विज्ञानस्य विविध -आयामाः' आसीत्।मुख्यवक्तृत्वेन प्रयागराजस्थ-केन्द्रीय-संस्कृत-विश्वविद्यालयस्य गङ्गानाथझा-परिसरस्य वेदविभागाध्यक्षः प्रोफेसर मनोज मिश्र-महोदय आसीत्। अनेन स्वीये वक्तव्ये विश्वस्य समस्तभाषाणां जननीत्वेन संस्कृतं विविध-ज्ञान-विज्ञानेन समन्वितं,भारतीयसंस्कृति- संस्कारादिना सह नैतिकमूल्यान्यपि शिक्षयत् अमूल्यनिधित्वेन सर्वसमाजोपयोगित्वं च विद्यते,यस्यान्तःकरणे धारणं कल्याणकारकमस्ति । यथोक्तं- 'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा'। स्वमहत्त्वपूर्णे वक्तव्ये मिश्रवर्यो वैदिकवाङ्मयस्य वैज्ञानिकरहस्यैः सह परिचयं कारयन् वैदिकविज्ञानस्य विविध-क्षेत्रस्थ-विषयान् उद्घाटयति। प्रश्नकाले विद्यार्थिभिः कृतजिज्ञासानामपि समाधानं

शेषभागः तृतीयेपुटे




# संस्कृतं जनेषु प्रचलिता भाषा भविष्यति - विनयः श्रीवास्तवः

(वार्ताहरः - गोपालकृष्णमिश्रः)

उत्तरप्रदेशसंस्कृतसंस्थानेन मईमासस्य २८तमे दिनाङ्के प्रेरणासत्रस्य आयोजनमभवत्। इदं प्रेरणासत्रं संस्थानस्य आनलाईनभाषाशिक्षणकक्ष्याया अन्तर्गतम् अभवत्। कार्यक्रमस्य रूपरेखा एवम् आसीत् यत् कार्यक्रमस्यारम्भे प्रशिक्षुः सुमितः तिवारी वैदिकमङ्गलाचरणं कृतवान्



। तदनन्तरं प्रशिक्षुमनीषपाण्डेयवर्येण सरस्वतीस्तोत्रं रविरुद्रपितामहेति प्रस्तुतवान्। संस्थानगीतिका सुश्री अञ्जलीमहोदयया विहिता। अतिथिपरिचयपुरस्सरं वाचिकस्वागतं योजनाया: समन्वयिका सुश्रीराधामहोदया कृतवती अथ च वृत्तकथनं संस्थानस्य प्रशिक्षिकेन श्रीगोपालमिश्रवर्येण कृतम्। मिश्रमहोदयः संस्थानस्य वृत्तकथने उक्तवान् यत् प्रतिमासं विंशति-दिवसानां संस्कृत-भाषा-शिक्षण-कक्षायामेकस्य बौद्धिकसत्रस्य आयोजनं भवति, यस्मिन् विदुषामुद्बोधनमाशीर्वचनञ्च प्राप्नुवन्ति प्रशिक्षवः छात्राः, सामाजिकाश्च । इतोपि संस्थानेनानेन न केवलं आभासिकं संस्कृतभाषाशिक्षणम् क्रियते अपितु जयन्तीसमारोहगृहे- गृहे -संस्कृतम्, योग-पौरोहित्य-ज्योतिषाद्यनेकाभिः योजनाभिः संस्कृतभाषायाः विकासः क्रियते। तदनन्तरं ऑनलाइनमाध्यमेन पठन्ती चीनदेशीया छात्रा टीना निञ्जा श्रीमद्भगवद्गीतायाः श्लोकान् श्रावितवती । ततः परम् एकं देशभक्तिगीतं गीताञ्जलीपन्तवर्यया कृतम्।

कार्यक्रमेऽस्मिन् मुख्यवक्तृरूपेण राष्ट्रिय-संस्कृत-विश्वविद्यालयस्य सहायकाचार्यश्रीमन्तः डॉ0 उदयनहेगडेवर्याः समागताः आसन् । स्वोद्बोधने महोदयैरुक्तं यत् प्राचीनानि निखिलानि शास्त्राणि पुराणानि वेदवेदाङ्गानि ज्ञातुं संस्कृतभाषा अवश्यं सर्वैरपि पठितव्या । संस्कृतभाषा आधुनिककाले वृत्तौ अपि आगच्छेत्, तथा प्रयासः करणीयः तथा च अस्माकं पुरातनज्ञानस्य पुनः अन्वेषणं बोधः परिज्ञानं च आवश्यकं वर्तते, तदर्थं संस्कृतसेना आवश्यकी अस्ति। तत्रैव संस्थानस्य निदेशकेन विनयश्रीवास्तववर्याणां मार्गदर्शनमपि सर्वैऽपि प्राप्तवन्तः। अत्र निदेशकेन श्रीवास्तववर्येण उक्तं यत् संस्कृतं सामाजिकजना अपि वदेयुः तदर्थमेव संस्थानं सतत्-रूपेण प्रयासरतोऽस्ति। अत्र ये केऽपि पठितुम् शक्नुवन्ति। नाम न केवलं अध्येतारः, बालकाः, पुरुषाः एतस्यां कक्षायां पठितुं शक्नुवन्ति, अपितु गृहिण्योऽपि कक्षां कर्तुं शक्नुवन्ति। एतस्मै शीघ्रमत्र पञ्जीकरणं कुर्वन्तु -https://sanskritsambhashan.com/ । इत्युक्ते भवन्तः भवत्यश्च सर्वेऽपि संस्थानद्वारा आनलाईनपञ्जीकरणं कृत्वा संस्कृतं पठितुं शक्नुवन्ति तथाच प्रायः उत्तरप्रदेशस्य सर्वेषु जनपदेषु गृहे-गृहे-संस्कृतम् इति योजनान्तर्गता साक्षात् आफलाईनकक्षाऽपि आयोजिता भवति, अतः । एवमेव सर्वेषां प्रयासैनैव संस्कृतं जनभाषा भविष्यति इति।

कार्यक्रमेऽस्मिन् उत्तरप्रदेशसंस्कृतसंस्थानस्य प्रमुखसचिवः जितेन्द्रकुमारः, सर्वेक्षकः श्रीमान् भगवानमहोदयः, प्रशिक्षणप्रमुखः सुधीष्टमिश्रः, प्रशिक्षणसमन्वयका: धीरजमैठानी दिव्यरञ्जनः राधा शर्मा च उपस्थिताः आसन् । कार्यक्रमस्य सञ्चालनं संस्थानस्य प्रशिक्षकेन दिवाकरमणित्रिपाठीवर्येण कृतम् ।

धन्यवादज्ञापनं प्रशिक्षकेन पङ्कजशर्म्मवर्येण कृतम् । विनयप्रकाशतिवारिमहोदयः शान्तिमन्त्रं कृत्वा सङ्गोष्ठ्याः समापनं कृतवान्। कार्यक्रमेऽस्मिन् संस्थानस्य सर्वे प्रशिक्षकाः सर्वे प्रशिक्षवश्च उपस्थिता आसन्।

# एकादशीतिथीया पञ्चमी वर्चुअल-राष्ट्रीय-व्याख्यानगोष्ठी समायोजिता

चातुर्वेद-संस्कृतप्रचार संस्थानद्वारा कन्हैयालाल माणिकलाल मुंशी हिन्दी तथा भाषाविज्ञानविद्यापीठम् डॉ.भीमराव आम्बेडकर विश्वविद्यालयः आगरा, राजकीयमहाविद्यालयः गुप्तकाशी (विद्यापीठम्) रुद्रप्रयागः उत्तराखण्डम् इत्येतेषां संयुक्तत्वावधाने १९-५-२०२४ तमे दिनाङ्के एकादशीतिथीया पञ्चमी वर्चुअल-राष्ट्रीय-व्याख्यानगोष्ठी समायोजिता। विशिष्टवक्ता डॉ. देवेशकुमारमिश्रः उपाचार्यः इन्दिरागाँधी-राष्ट्रीय-मुक्त-



विश्वविद्यालयः नवदिल्लीतः वाल्मीकिरामायणे कर्मफलम् इति विषयमादाय सारगर्भितं व्याख्यानं कृत्समुपस्थितार्मकुर्वाणो जीवः सुखं दुःखं , मानापमानादिकं फलमश्नुते। अस्माकं सफलता असफलतेत्येते कर्माश्रित एव। इत्थं विविध-दृष्टान्तैः सह सिद्धान्तपूर्वकञ्च विशिष्टं व्याख्यानं कृतम्। आध्यक्ष्यं मुख्यवक्तव्यञ्च प्रो. अनुराग शुक्लवर्येण विहितम्। महोदयः आगरा कॉलेज आगरायां प्राचार्य अस्ति। महोदयेन भगवतो रामस्य विश्वाभिरामस्वरूपं वाल्मीकिरामायणसन्दर्भे इतिविषयकं ज्ञानप्रदं व्याख्यानं कृतम्। तत्रादौ आचार्यकेशवकुमारः मङ्गलाचरणं सम्पादयत्। समन्वयिका डॉ. वर्षा रानीजी अतिथीनां परिचयपुरस्सरं स्वागतम् अकरोत्। संयुक्तसंयोजकः डॉ. गणेशभागवतः समेषां धन्यवादं विज्ञापयत्।

सञ्चालनं संगोष्ठीसंयोजकः डॉ. चन्द्रकान्तदत्तशुक्लः कृतवान्। अवसरेस्मिन् राजकीयमहाविद्यालयस्य प्राचार्यः प्रो.प्रतापसिंह जंगवाणः, युवकविः डॉ.अरविन्दकुमार तिवारी, प्रो. मञ्जुलता शर्मा , डॉ. निशीथ गौड, डॉ.खगेन्द्र कुमार मिश्रः, डॉ. सचिनदेवद्विवेदी, डॉ. निर्भयकुमारः, डॉ. अनामिका सिंह, डॉ. सन्ध्या ठाकुर, प्रिया विश्वकर्मा, प्रियंकायादव, अनन्या श्रीवास्तव, उमाजी पाटिलप्रभृतयो नैके विद्वांसः, शोधार्थिनः छात्राः श्रोतारश्च समुपस्थिताः आसन्।






# पाणिनिसंस्कृतविश्वविद्यालये विशिष्टव्याख्यानस्य आयोजनं जातम्

डॉ.दिनेश चौबे,



उज्जयिनी। पाणिनिसंस्कृतविश्व-विद्यालयस्य विशिष्टसंस्कृतविभागेन भारतीयज्ञानपरम्परा, नवीनसंशोध-नसंभावना इति विषये आभासीयपटलद्वारा विशेषव्याख्यानस्य आयोजनं कृतम्। मुख्यवक्ता, केन्द्रीयसंस्कृतविश्वविद्यालयस्य नवदेहली इत्यस्य उपाचार्यः डॉ. पवनव्यासः आसीत्। डॉ. व्यासः भारतीयज्ञानपरम्परायाः विशेषताविषये व्याख्यानं प्रस्तुतवान्, तस्मिन् संशोधनक्षेत्राणि के भवितुमर्हन्ति इति। सत्रस्य अध्यक्षा विशिष्टसंस्कृतविभागप्रमुखा डॉ. पूजा उपाध्यायः अध्यक्षीय भाषणे उक्तवती यत् संस्कृतसंशोधनक्षेत्रे नवीन प्रकल्पानाम् आवश्यकता वर्तते। कार्यक्रमस्य संचालनं डॉ. पूजा गौर धन्यवादज्ञापनञ्च डॉ. कृष्णकुमारत्रिपाठी कृतवान्। शान्तिमन्त्रेण व्याख्यानस्य समाप्तिः अभवत् ।

# पाणिनिसंस्कृतविश्वविद्यालये 2024-25 सत्रे प्रवेशः आरब्धः

डॉ. दिनेश चौबे, उज्जयिनी

राज्यशासनद्वारा स्थापितः विश्वविद्यालयानुदानायोगद्वारा मान्यताप्राप्तः प्रदेशस्य एकमात्रपुरातनविद्याध्ययनस्य केंद्रः उज्जयिनीस्थस्यमहर्षि पाणिनिसंस्कृतवैदिकविश्वविद्यालयः, एवञ्च विश्वविद्यालयस्य उपकेन्द्रश्रीरामानुजसंस्कृतपरिसरे, रीवानगरे सत्र 2024-25 हेतोः विभिन्नपाठ्यक्रमेषु प्रवेशार्थं प्रक्रिया आरब्धा जाता। विश्वविद्यालयेन सन्चालितेषु विविध पाठ्यक्रमेषु रिक्तस्थानानां विरुद्धं प्रवेशं ग्रहीतुं शक्यते। यत्र स्नातकोत्तर (आचार्य) इत्यस्य 8 विषये, एम.ए इत्यस्य 6, एवं च एम.एससी (योगविज्ञानम्) बी.पी.ई.एस., (स्नातक) शास्त्री 8 विषय, शास्त्री + शिक्षाशास्त्री, बी.ए 16, स्नातकोत्तर डिप्लोमा पाठ्यक्रमे 7 आवेदनं कर्तुं शक्नोति। विश्वविद्यालये यूजी, पीजी, यूजी डिप्लोमा, पीजी डिप्लोमा, बी.एड आदिषु रिक्तस्थानेषु प्रवेशार्थं आवेदनपत्राणि आमन्त्रितानि इति। कुलसचिवः प्रो.दिलीपसोनी अवदत्। एतदतिरिक्तं एनएसएस, एनसीसी इत्यादीनां यूनिट् अपि विश्वविद्यालये अध्ययनं कुर्वतां छात्राणां सर्वतोमुखविकासाय कार्यं कुर्वन्ति। संस्कृतशिक्षणप्रशिक्षणस्य ज्ञानविज्ञानसंवर्धनकेन्द्रस्य प्रभारीनिदेशकः डॉ. अखिलेशकुमारद्विवेदी उक्तवान् यत् संस्कृतं शिक्षितुम् इच्छुकानां सामाजिकजनानाञ्कृते विश्वविद्यालयकेन्द्रेण सायं संस्कृतकक्षाः अन्ये च उपयोगिनो प्रमाणपत्रपाठ्यक्रमाः अपि सञ्चाल्यन्ते यस्मिन् कस्यापि आयुवर्गस्य जनाः प्रवेशं ग्रहीतुं शक्नुवन्ति। विश्वविद्यालये शोधकार्यस्य कृते पृथक् सूचना निर्गता भविष्यति। अधिकज्ञानाय विश्वविद्यालयशिक्षणविभागः, देवासरोड, उज्जयिन्यां सम्पर्कं साधयन्तु । अथवा विश्वविद्यालयस्य जालपुटं mpsvv.ac.in अत्र पश्यन्तु।

# विशेषव्याख्यानस्य आयोजनं जातम्

डॉ.दिनेश चौबे, उज्जयिनी

उज्जयिनीस्थस्य महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य शोधविभागस्य आश्रयेण 31/05/24तमे दिनाङ्के शोधकर्तृभ्यः कृत्रिमबुद्धिविषये आभासीयपटलमाध्यमेन विशेषव्याख्यानस्य आयोजनं कृतम्। मुख्यवक्ता श्रीविक्रान्तदीपकशाहः, हैदराबाद, तेलङ्गाना, माइक्रोसॉफ्टकम्पनीसमूहस्य उत्पादप्रबन्धकः आसीत्। महोदयः आर्टिफिशियल इन्टेलिजेन्स इत्यस्य अन्तर्गतं बीज हचज इत्यस्य अनेकाः उपयोगाः व्याख्यायतवान्। ये संशोधनार्थं अतीव उपयोगिनो भवन्ति। प्रारम्भे कुलगुरुः प्रो. विजयकुमारः सीजीमहोदयः मार्गदर्शनं कृतवान्। अन्ते सत्रस्य अध्यक्षा डॉ. पूजा उपाध्याया, विशिष्टसंस्कृत विभागप्रमुखा सभां संबोधितवती। संचालनं डॉ. पूजागौर इत्यनया कृतम्।

# प्रधानमन्त्री इव स्वीये भाषणे संस्कृतमाचरणीयम्-सतीशशर्मा

शशिकान्तः

उत्तरप्रदेशसंस्कृतसंस्थानेन भाषाविभागस्य अन्तर्गतं सञ्चालितस्य ऑनलाइन संस्कृतभाषायोजनायाः अन्तर्गतं सञ्चालितस्य सद्यास्कसरलसंस्कृतसम्भाषणकक्षायां प्रेरकसत्रस्य आयोजनं कृतम्। उद्घाटनमस्य प्रशिक्षु महक द्वारा विहितम्। सत्रास्य संचालनं विनयः




कृतवान्। उद्घाटनसम्बोधनकथनं प्रशिक्षक शशिकांतः कृतवान्। डॉ. विदुषी अनुभवमुक्तवती। संस्थानगीतिका रेखामहोदया द्वारा प्रस्तुता। ज्योति स्वागतीकरणरूपेण मधुरकण्ठेन हरिस्तोत्रं गीतवती। स्वागतभाषणं वृत्तकथनञ्च समन्वयक दिव्यरञ्जन महोदयेन कृतमुक्तञ्च संस्थानमस्मिन् विषये महत् कार्यं कुर्वदस्ति। अनेन गृहे उपविश्य बहूनां जनानां हितं भवति। एतत् केवलं कार्यं न अपितु अभियानमस्ति ।अतिथिपरिचयं च प्रशिक्षकः रजनीशः दत्तवान् । मुख्यातिथिः संस्कृतप्रेमी, भाषणदक्षश्च विद्वान् सतीश शर्मा इतीदं कथितवान् यत् संस्कृतज्योतिः सर्वत्र प्रसरेत्। सर्वत्र संस्कृतदीपः ज्वालनीयः एव। संस्कृते एव नूतनाविष्कारशैली वर्तते । मोदिमहोदयः इव अस्माकं वक्तव्ये संस्कृतसूक्तः भवेयुः एव। यत्र गच्छाम: तत्र संस्कृतात् एव प्रारम्भं कुर्याम । अस्माकं संस्कृत वार्तालापेन एव वृत्ति-अवसराः उपलप्स्यन्ते ।बहुविषयेषु सूचनां दत्त्वा कथाभिः तेन छात्राः प्रेरिताः। एतत् श्रुत्वा एव सर्वे मुग्धाः सम्मोहिताः च भवन्ति। संस्कृतभाषा न केवलं भारते एव पूज्यते अपितु सम्पूर्णं जगत् तया दर्शितं मार्गम् अनुसरति। सः अवदत् यत् वेदपुराणादिकं संस्कृते एव निहितमस्ति । गीता इत्यादिषु विषयेषु अपि प्रकाशं क्षिप्तवान्।

प्रशिक्षकान् प्रोत्साहयन् मुख्यातिथिः अवदत् यत् अस्माकं चरित्रम् एव सर्वं सर्वप्रथमञ्च । चरित्रं संस्कृतं निर्माति । अतः संस्कृतप्रचारः एकेन न अपितु सर्वैः करणीयः । जीवने काश्चन समस्या: उत्पद्यन्ते एव अस्माकं सुखदं दुःखदं च भवति, तदा संस्कृतभाषायां निहितग्रन्थान् अवलोक्य तेषां दर्शितः मार्गः अनुसरणीयः। सत्रे प्रशिक्षकः डॉ. सत्यप्रकाशः सर्वेभ्यः धन्यवादं दत्तवान्।

प्रशिक्षकः रजनीशमहोदयः शान्तिमन्त्रं कृतवान्। कार्यक्रमस्य अन्ते प्रशिक्षकः डॉ. लक्ष्मीनारायण छात्राणां कृते कक्षासम्बद्धाः सूचनाः प्रदत्तवान्, प्रचारार्थं च प्रेरितवान्। कार्यक्रमे विनय श्रीवास्तवः उत्तरप्रदेशसंस्कृतसंस्थानस्य निदेशकः, प्रो. अधिकारी डॉ. दिनेश मिश्रः, सर्वेक्षकः भगवान् सिंहः, प्रशिक्षण प्रमुखः सुधिष्ठ मिश्रः, समन्वयकः धीरज मैठाणी, दिव्य रंजन राधा शर्मा, अनिल गौतमः, संस्थान प्रशिक्षक डॉ. सत्यप्रकाश मिश्रः, विनयशुक्लः , शशिकांतः, रजनीशः, लक्ष्मीनारायणः, इत्यादयः अन्ये शिक्षकाः अन्ये च शताधिकसामाजिकाः जनाः ऑनलाइनमाध्यमेन उपस्थिताः आसन्।

# मुरलीधरेण योगविज्ञान-विषये प्राप्तः विद्यावारिधि इत्युपाधिः



रामनगरम्। रामनगरस्थ-पीएनजी राजकीय- स्नातकोत्तर-महाविद्यालय-योग-वैकल्पिक- चिकित्साविभागस्य योगप्रशिक्षकः मुरलीधर कापड़ी महोदयः 'वैदिकवाङ्मये प्राणतत्त्वस्य यौगिकानुशीलनम्' इत्यस्मिन् योगविज्ञानविषयके शीर्षके पीएचडी इत्युपाधि : प्राप्तः। मुरलीधर कापड़ी महोदयाय पीएचडी उपाधिः जगदीश प्रसाद झावरमल टीबड़ेवाला विश्वविद्यालय झुंझुनू राजस्थान द्वारा प्रदत्तः। अयं स्वशोधकार्यं योगविज्ञानविभागस्य शोधनिदेशकस्य डॉ.राजेश कुमार इत्यस्य कुशलमार्गनिर्देशने पूर्णं कृतवान्। विद्यावारिधि-उपाधेः पूर्वं मुरलीधर कापड़ी पी.जी. डिप्लोमा इन योगस्य स्नातकोत्तरयोगस्य च उपाधिं सोबन सिंह जीना विश्वविद्यालय,अल्मोड़ा इत्यतः योगविज्ञान-विभागाध्यक्षस्य डॉ. नवीनचन्द्रभट्टस्य दिशानिर्देशने प्राप्तवान्। अयं स्वसाफल्यस्य श्रेयः माता -पितृभ्यां,गुरुजनेभ्यः,पत्न्यै, भ्रातृभ्यश्च दत्तवान्। डॉ.मुरलीधर महोदयस्य उपाधि-मेलनात् परं महाविद्यालयस्य प्राचार्यः प्रोफेसर एम.सी.पाण्डे,कुलानुशासकः प्रो.एस.एस.मौर्यः, प्रो.जे.एस.नेगी,डॉ.सुमन कुमारः,डॉ.मूलचन्द्र शुक्लः, डॉ.डी.एन.जोशी,डॉ.नितिन ढोमणे इत्यादिभिः सह महाविद्यालयपरिवारस्य नैके जनाः वर्धापनानि शुभकामनाश्च दत्तवन्तः। योगप्रशिक्षकः मुरलीधर कापड़ीमहोदयः विगतवर्षेभ्यो योगस्य प्रचारप्रसाराय प्रत्येकं जनं यावत् जनजागरूकताम‌ाध्यमेन निःशुल्कं योगशिविराणि उत्तमस्वास्थ्यलाभाय समायोजयति।

# सततशैक्षिकविकासस्य भारतीयसंकल्पना इति विषये विशिष्टव्याख्यानस्य आयोजनं जातम्

डॉ.दिनेश चौबे , उज्जयिनी



उज्जयिनीस्थस्यमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य शिक्षाविभागस्य आश्रयेण १८मै तमे दिनाङ्के सायं ४:३० वादनतः आभासीपटलमाध्यमेन 'सतत शैक्षिकविकासस्य भारतीयसंकल्पना' इति विषये विशेषव्याख्यानस्य आयोजनं जातम्। मुख्यवक्तृरूपेण आचार्यः नीलाभतिवारीमहोदयः शिक्षाशास्त्रविभागप्रमुखः, केन्द्रीयसंस्कृतविश्वविद्यालयः, भोपालपरिसरः आसीत्। महोदयेन स्वव्याख्याने शिक्षायाः प्रमुखोद्देश्यानि, शिक्षया सामाजिकपरिवर्तनं, तथा च भारतीयज्ञानपरम्परायां अध्ययनस्य स्वरूपं, ज्ञानसंचारप्रक्रिया, शिक्षायां पञ्चकोशीविकासस्य सिद्धान्तान् च उपस्थाप्यत्। कार्यक्रमस्य संरक्षकः कुलगुरुः आचार्यः विजयकुमारसीजीवर्य तथा च मार्गदर्शकः कुलसचिवः आचार्यः दिलीपसोनीमहोदयः व्याख्यनस्य सफलमायोजनाय शुभकामनां प्रदत्तवन्तौ। सत्राध्यक्षा, शिक्षाशास्त्रविभागप्रमुखा डॉ. पूजाउपाध्यायामहोदया स्वविचारे उक्तवती यत् छात्राः सर्वदा स्वाध्यायिनः भवेयुः ,नूतनविषयेषु ज्ञानं प्राप्तुं सर्वदा प्रयत्नशीलाः च , सन्तु। कार्यक्रमस्य संचालनं डॉ. संतोषकाण्डपालमहोदयेन एवञ्च धन्यवादज्ञापनं डॉ. विश्वामित्ररायमहोदयेन विहितम्। व्याख्यानकार्यक्रमे छात्राः, शाधकर्तारः, विभागप्रमुखाः, शिक्षकाः च आभासीयपटल जूम्एप इत्यस्य माध्यमेन व्याख्यानं श्रुतवन्तः। कल्याणमन्त्रेण सह कार्यक्रमस्य समापनम् अभवत्।

# संस्कृतकक्षाणां माध्यमेन संस्थानं ददाति संस्काराणां शिक्षाम्- विनयश्रीवास्तवः

संस्काराणां मूलं विद्यते संस्कृतभाषा- सतीशशर्मा

लखनऊ - उत्तरप्रदेश संस्कृतसंस्थानेन भाषाविभागस्य अन्तर्गतं सञ्चालितस्य ऑनलाइन संस्कृतभाषायोजनायाः अन्तर्गतं सञ्चालित सद्यस्क सरलसंस्कृत सम्भाषणकक्षासु कार्यकारिअध्यक्षस्य आइ ए एस जितेन्द्र कुमारस्य (अपरमुख्यसचिवः) प्रेरणया मान्यनिदेशकस्य विनयश्रीवास्तवस्य च निर्देशने प्रेरकसत्रस्य आयोजनं कृतम् । उद्घाटनमस्य प्रशिक्षुमहकद्वारा विहितम् । सत्रास्य संचालनं विनयः कृतवान् । उद्घाटनसम्बोधनकथनं प्रशिक्षक शशिकांतः कृतवान्। डॉ. विदुषी अनुभवमुक्तवती । संस्थानगीतिका रेखामहोदया द्वारा प्रस्तुता। ज्योति स्वागतीकरणरूपेण मधुरकण्ठेन हरिस्तोत्रं गीतवती। स्वागतभाषणं वृत्तकथनञ्च समन्वयक दिव्यरञ्जन महोदयेन कृतमुक्तञ्च संस्थानमस्मिन् विषये महत् कार्यं कुर्वदस्ति। अनेन गृहे उपविश्य बहूनां जनानां हितं भवति। एतत् केवलं कार्यं न अपितु अभियानमस्ति। अतिथिपरिचयं च प्रशिक्षकः रजनीशः दत्तवान्। मुख्यातिथिः संस्कृतप्रेमी, भाषणदक्षश्च विद्वान् सतीशशर्मा कथितवान् यत् संस्कृतज्योतिः सर्वत्र प्रसरेत्। सर्वत्र संस्कृतदीपः ज्वालनीयः एव। संस्कृते एव नूतनाविष्कारशैली वर्तते। मोदिमहोदयः इव अस्माकं वक्तव्ये संस्कृतसूक्तः भवेयुः एव। यत्र गच्छामः तत्र संस्कृतात् एव प्रारम्भं कुर्याम। अस्माकं संस्कृत वार्तालापेन एव वृत्ति-अवसराः उपलप्स्यन्ते। बहुविषयेषु सूचनां दत्त्वा कथाभिः तेन छात्राः प्रेरिताः। एतत् श्रुत्वा एव सर्वे मुग्धाः सम्मोहिताः च भवन्ति । संस्कृतभाषा न केवलं भारते एव पूज्यते अपितु सम्पूर्णं जगत् तया दर्शितं मार्गम् अनुसरति। सः अवदत् यत् वेदपुराणादिकं संस्कृते एव निहितमस्ति। गीता इत्यादिषु विषयेषु अपि प्रकाशं क्षिप्तवान्। प्रशिक्षकान् प्रोत्साहयन् मुख्यातिथिः अवदत्यत् अस्माकं चरित्रम् एव सर्वं सर्वप्रथमञ्च । चरित्रं संस्कृतं निर्माति। अतः संस्कृतप्रचारः एकेन न अपितु सर्वैः करणीयः। जीवने काश्चन समस्याः उत्पद्यन्ते एव अस्माकं सुखदं दुःखदं च भवति, तदा संस्कृतभाषायां निहितग्रन्थान् अवलोक्य तेषां दर्शितः मार्गः अनुसरणीयः। सत्रे योजनाप्रमुखः भगवानसिंहचौहानः, प्रशासनिकः डॉ दिनेशमिश्रः, जगदानन्दझाः, महेन्द्रपाठकः, लेखाकारः नितेशश्रीवास्तवः आशुलिपिकः वीरेन्द्रतिवारी, पूनममिश्रा, कार्यालयीयपदाधिकारिणः सर्वे समन्वयकाः , प्रशिक्षकः डॉ. सत्यप्रकाशः सर्वेभ्यः धन्यवादं दत्तवान्। प्रशिक्षकः रजनीशमहोदयः शान्तिमन्त्रं कृतवान्। कार्यक्रमस्य अन्ते प्रशिक्षकः डॉ. लक्ष्मीनारायण छात्राणां कृते कक्षासम्बद्धाः सूचनाः प्रदत्तवान्, प्रचारार्थं च प्रेरितवान्। कार्यालयतः सहयोगिनः ऋषभपाठकः शान्तनुमिश्रः, शिवमगुप्ता, संस्थान प्रशिक्षकेषु डॉ. सत्यप्रकाश मिश्रः, विनयशुक्लः, शशिकांतः, रजनीशः, लक्ष्मीनारायणः, इत्यादयः अन्ये च शताधिकं सामाजिकाः जनाः ऑन लाइनमाध्यमेन उपस्थिताः आसन्।

प्रथमपुटस्य शेषभागः **वैदिकवाङ्मयेषु निहिताः....**

प्रयच्छति।वेदानामाविर्भावः कर्मकाण्ड-आदीनां मुख्यविषयाणां प्रतिपादनमाध्यमेन वैज्ञानिकसिद्धान्तानामुद्घाटनार्थं नियत-उत्तमकर्मकरणार्थं च अभवत्यथा-विद्युत-उत्पादनादिसिद्धान्तः। नासदीय-आदि- अनेकानि सूक्तानि विविधोदाहरणानि वरीवृत्यन्ते।एतस्मात् पूर्वं मुख्यातिथिमहोदयस्य स्वागतं कुर्वन् कार्यक्रमनिदेशकः प्राचार्यः प्रोफेसर एम. सी.पाण्डे वर्यः स्वसम्बोधने वक्ति यत् वेदाः केवलं कर्मकाण्डेत्यादिविषयान् एव न प्रतिपादयन्ति अपितु लोकोपकारक-वैज्ञानिकसिद्धान्तान् अपि पुरस्कुर्वन्ति।आयोजक-सचिवः संस्कृतविभागस्य प्रभारी च डॉ. मूलचन्द्र शुक्लः समेषामपि आगतानामभिनन्दनं कृत्वा विषयवस्तुनः प्रास्ताविकं प्रस्तौति।कार्यक्रमस्य प्रबन्धने विशेषसाहाय्ये च करियर-काउंसलिंग- प्रकोष्ठस्य संयोजकः डॉ.अनुराग श्रीवास्तवः, सहसंयोजकः डॉ. दीपक खाती वर्यः प्रकाश सिंह बिष्टश्च आसन।कार्यक्रमस्यान्ते आयोजनसहसचिवः योगप्रशिक्षकश्च डॉ. मुरलीधर कापडी महोदयः प्राचार्येण मुख्यवक्त्रा च सह समेषां ध न्यवादज्ञापनं विदधाति। अस्मिन् कार्यक्रमे रामनगरमहाविद्यालयेन सह विविध-विद्यालय-महाविद्यालय- विश्वविद्यालयानां गणमान्य-जनाः उपस्थिता आसन्। बनबसा प्राचार्या डॉ.आभा शर्मा,कुलानुशासकः प्रो.एस.एस.मौर्यः,प्रो.विनोद गुप्तः,प्रो.जे.एस. नेगी,डॉ.सुधा मिश्रा, डा.ईशनारायण द्विवेदी, डॉ.मुरलीधरमिश्रः,डॉ. भावनापन्तः,डॉ.डी.एन.जोशी,डॉ.राघव झाः,डा. नीलेश उपाध्यायः, डा.अम्बरीष मिश्रः,डॉ. नीरज जोशी,डॉ.मिताली सिंहः,परिसीमा रथ,डॉ. रेनुका, डा.प्रकाशचन्द्र उप्रेती,डॉ. शारदा पाठक,डॉ. शिप्रा पन्तः, डा. सुबोध कुमार झाः,डॉ. सत्यप्रकाशः, डा. निरुपमा मिश्रा,ज्योतिर्मयी परिडा,रेनुका परिडा, प्राची,नीरज,डा. देवेन्द्र पाण्डेय,डॉ. गिरिजा शंकर यादवः,आदेश मिश्रः,इत्यादयः प्रतिभागं कृतवन्तः।

प्रथमपुटस्य शेषभागः

**विद्वद्विभूतीनां डॉ.विन्ध्येश्वर पाण्डेयानां...**

परमधामगमनं 93 वर्षस्य अवस्थायां 10 मई 2023 दिनांके अभवत्। उत्तरप्रदेशस्य हमीरपुरस्थ झलोखर संस्कृतमहाविद्यालयस्य प्रधानाचार्य पदात् 1991तमे वर्षे सेवानिवृत्तेः पश्चात् गुरवः वृद्धावस्थायाः अधिकाधिकं समयं वृन्दावनस्य रङ्गनाथमन्दिरे व्यतीतवन्तः, यत्र तेषां प्रकोष्ठं प्रति भारतवर्षस्य विभिन्नविद्वांसः स्वकीयं प्रश्नं जिज्ञासाया: च समाधानस्य हेतोः आगच्छन्त: आसन्।। गुरवः 20 ग्रन्थान् शताधिक निबन्धानि च लिखितवन्तः।लेखने शास्त्रतत्त्वानाम् अतिरिच्य राष्ट्रियता तेषां प्रमुखः विषयः आसीत्। प्रौढसंस्कृतकाव्य, गीतागंगाप्रभृता इत्येतेषां कृते ते दिल्लीराज्यशासनैः पुरस्कृताः। एतेषाम् अतिरिच्य अपि अनेकाः पुरस्काराः गुरुभिः प्राप्ताः। गुरूणां परमधामगमनस्य प्रथमवार्षिकी उपलक्ष्ये तेषां शिष्यपरिकरैः शङ्खचक्राङ्कित लाडलेमतिमान् शिष्यस्य ब्रजेशपाठकस्य ज्योतिषाचार्यस्य नेतृत्वे वृन्दावनस्य श्रीराधाकृष्णरघुनाथमन्दिरे त्रिदिवसीयानां भव्यवैकुण्ठोत्सवस्य आयोजनं कृतम्। एतत् आयोजनं श्रीपुण्डरीकाक्षाचार्याणां वेदान्ती-महोदयानां मार्गदर्शने आशीर्वादे च संपन्नम्। अस्मिन् आयोजने आचार्यऋषिकुमारतिवारी सह समस्तकार्यक्रमस्य रूपरेखायां आचार्यजयकेशवमहोदयः व्यवस्थापकस्य भूमिकायाम् आसीत्। माधवभार्गवः, पवन पाण्डेयः, दीपकतिवारी इत्यादयः शिष्याः गुरूणां प्रति स्वकीयान् कर्तव्याणां श्रद्धापूर्वकं निर्वहनं कृतवन्तः। हरिहरज्योतिर्विज्ञानसंस्थानस्य कोषाध्यक्षः श्रीकुन्दनकुमारझा महोदयस्य नेतृत्वे भारतवर्षस्य विभिन्नराज्येभ्यः जयगणेशः, नीरजशर्मा, शशिभूषणः, गौतमः, सुदर्शनाचार्यः, रजतमैनी इत्यादयः निष्ठावान् कार्यकर्ताः वैकुण्ठोत्सवे उपस्थिताः आसन्। वृंदावनस्य तीर्थपुरोहितः श्रीसुदर्शनाचार्यस्य आचार्यत्वे 25 ब्राह्मणैः सामूहिक-वाल्मिकीयरामायणम्, श्रीमद्भागवतमहापुराणम्, श्रीमद्भगवद्गीता, रामानुजभाष्यम्, श्रीभाष्यम्, सहस्रगीतिका इत्यादि ग्रन्थाः सस्वरेण पारायणिताः। तृतीये दिने वीथीभ्रमणम्, 108 ब्राह्मणानां भोजनं अथच गुरुभिः लिखिताः ग्रन्थानां वितरणेन सह वैकुण्ठोत्सवः पूर्णः अभवत्।

# सम्पादकीयम्

सम्मान्याः सुरभारतीसमुपासकाः!

सादरं नमोनमः।

लोकतंत्र पर्वणः सामान्यनिर्वाचनात् परं प्रधानमंत्री नरेंद्र मोदी कन्याकुमारी स्थिते विवेकानंद रॉक मेमोरियल इत्यत्र 45 होरात्मिकां साधनाम् अकरोत् स प्रधानमंत्रिणः ध्यान साधनायाः अनेके अर्थाः-विपक्षी राजनीतिक दलानि प्रधानमंत्रिद्वारा चुनाव आचार संहितायाः उल्लंघनमिति प्रतिपादयन्ति केवलं प्रचार माध्यमं वदन्तिस कांग्रेसाध्यक्ष मल्लिकार्जुन खड़गे उक्तवान् यत् राजनीतिः धर्मश्च कदापि एकेन सार्धं नैव आनेतव्यौ। धार्मिक भावनानां सम्बद्धता निर्वाचनेन सह नास्तिस तेन प्रधानमंत्रिणः ध्यान योगः केवलं नाटकं प्रतिपादितम्स एतद् अत्यंतं दुखदं । विगतवर्षाणि इव भवतु सा राम मंदिरस्य अवमानना सनातनाय रोगः इति संबोधनं च, विपक्षी दलाना एतच्चिंतनम् अत्यंत निराशा जनकम्। तथ्यमेतत् यद् धर्मः सदैव राजनीति मार्गं प्रशस्तीकरोति। प्रधानमंत्री अनेकधा स्वसाक्षात्कारे कथितवान् यत् धर्मशक्तिः तं राष्ट्रियहिते सर्वस्वं समर्पयितुं प्रेरयति स लोकतंत्रे निर्वाचनसमयः एकां निर्णायक परिस्थितिं जनयति। एकस्मिन् समये केवलं धर्मः एव समाजस्य मार्गं प्रशस्तीकर्तुम् अर्हति। सम्भवतः अनुभूत्या अनया प्रधानमंत्री 2014तमे वर्षे 2019तमे वर्षे च निर्वाचने ध्यान योगम् आश्रितवान्। विपक्षी दलैः तदानीमपि एतदुद्दिश्य प्रश्नचिह्नानि विहितानि। एवं प्रधानमंत्रिणः आलोचना केवलं सनातन विरोधिनी कथयितुं शक्यते। वस्तुतः प्रधानमंत्री यस्मिन् स्थाने ध्यान योगस्य साधनायै गतः तत्र स्वामी विवेकानंदः विकसित भारतस्य स्वप्नम् अपश्यत् स संभवतः प्रधानमंत्री अपि देशं मार्गेस्मिन् प्रशस्तीकर्तुं कार्यं कुरुते। धर्मस्य चिंतनं सदैव सकारात्मक निर्णये सहायकं भवति। विज्ञानमिव आध्यात्मेनापि शाश्वत नियमः अन्विष्टः। आधुनिक काले वैज्ञानिक अन्वेषणं निरंतरं जायते। परंतु अध्यात्मनो धर्मक्षेत्रस्य च मार्गः अवरुद्धः। अनेनैव कारणेन निराशावादी वातावरण प्रगतिं कुरुते । तत् फलस्वरुपेण विश्वे युद्धस्य अशांतेश्च वातावरणं विनिर्मीयते सअद्य संपूर्णाय विश्वस्मै अध्यात्म प्रदत्त गहन चिंतनस्य आवश्यकता वर्तते।

भवदीया

सम्पादिका

## वेदामृतम्

**स्वग्नयो हि वार्यं देवासो दधिरे च नः।**
**स्वग्नयो मनामहे ।।८।।**

अर्थ-इस मन्त्र में लुप्तोपमालङ्कार है। मनुष्यों को योग्य है कि ईश्वर ने इस संसार में जितने पदार्थ उत्पन्न किये हैं उनके जानने के लिए विद्याओं का सम्पादन करके कार्यों की सिद्धि करें ।।८।।

फिर किसलिए उस ईश्वर की प्रार्थना करने और मनुष्यों से परस्पर वर्त्तने का उपदेश अगले मन्त्र में किया है-

अथा न उभयेषाममृत मयीनाम्।
मिथः सन्तु प्रशस्तयः ।।९।।

अर्थ-जब तक मनुष्य राग वा द्वेष को छोड़कर परस्पर उपकार के लिए विद्या शिक्षा और पुरुषार्थ से उत्तम-उत्तम कर्म नहीं करते, तब तक वे सुखों के सम्पादन करने में समर्थ नहीं हो सकते। इसलिए सब को योग्य है कि परमेश्वर की आज्ञा में वर्तमान होकर सबका कल्याण करें ।।९।।

फिर वे कैसे वर्ते, इस विषय का उपदेश अगले मन्त्र में किया है-

**विश्वेभिरग्ने अग्निभिरिमं यज्ञमिदं वचः।**
**चनो धाः सहसो यहो ।।१०।।**

अर्थ-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। मनुष्यों को योग्य है कि अपने सन्तानों को निम्नलिखित ज्ञान कार्य में युक्त करें जो कारणरूप नित्य अग्नि है उससे ईश्वर की रचना में बिजुली आदि कार्यरूप पदार्थ सिद्ध होते हैं फिर उनसे जो सब जीवों के अन्न को पचानेवाले अग्नि के समान अनेक पदार्थ उत्पन्न होते हैं उन सब अग्नियों को कारणरूप ही धारण करता है। जितने अग्नि के कार्य हैं वे वायु के निमित्त से ही प्रसिद्ध होते हैं उन सब पदार्थों को संसारी लोग धारण करते हैं अग्नि और वायु के विना कभी किसी पदार्थ का धारण नहीं हो सकता, इत्यादि ।।१०।।

# शिक्षणाधिगमस्य भारतीया परम्परा

## Bhartiya Tradition of Teaching & Learning

-डॉ. सुरेन्द्रमहतो
सहायकाचार्यः, शिक्षापीठम्,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली।

शिक्षणम् अधिगमश्च एका नैसर्गिकीक्रिया अस्ति। एषा क्रिया प्राणिषु भवति। प्राणिनः क्रियायाः एतस्याः सम्पादनं स्वेच्छापूर्त्तये आत्मसंतुष्टये च कुर्वन्ति। प्राणिषुमानवः श्रेष्ठः। अतः मानवेषु एषा क्रिया प्रकृष्टरूपेण भवति। शिक्षणस्य क्रियां,अधिगमस्य क्रियां च मेलयित्वा शिक्षणाधिगमप्रक्रियारूपेण ज्ञायते। शिक्षणाधिगमविषये निखिलेऽपि विश्वे शिक्षाशास्त्रिणः प्राचीनकालादैव मननशीलाः सन्ति। एषा क्रिया स्वभाविकी योजिता च भवति। लौकिकी शास्त्रीया च, इत्युक्ते औपचारिकीअनौपचारिकी चप्रसिद्धा। शिक्षणाधिगमविषये भारतीयपरम्परा समृद्धा वर्तते। भारतीयवाङ्मये विषयेऽस्मिन् बहुषु स्थलेषु लिखितं वर्तते। यथा- आचार्यः पूर्वरूपम्। अन्तेवासी उत्तररूपम्। विद्या सन्धिः इति विद्यम्।[1] इत्युक्ते ज्ञानप्राप्तये पक्षत्रयस्य उपस्थितिः अनिवार्या। श्रीमद्भगवद्घ्गीतायां ज्ञानं ज्ञेयं परिज्ञाता।[2] अन्यत्रापि आत्मविषयकं चिन्तनं परिस्थितिषु अनुकूलनाय चिन्तनं, इतिरीतिद्वयं प्रचलितं वर्तते। शास्त्रीया (वैदिकी) लौकिकी व्यावहारिकी च। वैदिकी श्रुत्यादिः। लौकिकी पञ्चतन्त्रहितोपदेशादिः। सर्वत्र शिक्षणाधिगमस्य भारतीयस्वरूपं सन्निहितं वर्तते। परंशोधपत्रेऽस्मिन् किञ्चित् प्रमुखसन्दर्भ एव चर्चिष्यते। यथा- व्याकरणसिद्धान्तकौमुद्याः क्त्वा[3] णिच्[4] शिक्षणाधिगमे कथं प्रयोगः।


**पारिभाषिकशब्दाः**-शिक्षणम्,अधिगमः, भारतीया परम्परा, श्रुतिः, स्मृतिः, श्रीमद्भगवद्गीता, पञ्चतन्त्रम्, हितोपदेशः, लौकिकः वैदिकः क्त्वा अवापोद्वापः च।

उद्देश्यानि -

i. शिक्षणाधिगमसम्प्रत्ययस्य ज्ञानम्।
ii. शिक्षणाधिगमस्य भारतीयपरम्परायाः ज्ञानम्।
iii. विविधभारतीयग्रन्थेषु शिक्षणाधिगमस्य स्वरूपस्य ज्ञानम्।
IV. णिच्-क्त्वा प्रत्यययोः शिक्षणाधिगमे प्रयोगस्यज्ञानम्।
V. वर्तमानशिक्षणाधिगमे उपयोगः।

शिक्षणम् अधिगमघ्श्च शिक्षायाः क्रियाद्वयं भवति पृथक्त्वेन एकत्वेन तु एक एव शिक्षणाधिगमः। यदा शिक्षणं भवति तदैव अधिगमोऽपि भवति,यदा अधिगमः भवति तदैव शिक्षणमपि भवति। इत्युक्ते शिक्षणं पृथक् क्रिया, अधिगमः पृथक् क्रिया इतिरूपेणापि विद्वज्जनाः स्वकुर्वन्ति। शिक्षाप्रक्रियायां मुख्यरूपेण शिक्षणाधिगमे अवधानं भवति। अतः शिक्षणम् अधिगमः शिक्षा च क्रिया एव। कालिदासः तु एकत्वेन स्वीकृत्य लिखितवान्श्लिष्टाक्रिया[5] । कस्यचित्कस्यापिक्रिया शिक्षा। विद्याभ्यासः। आत्मघनिष्ठा अधिगमस्वरूपम्। संक्रान्तिः शिष्येषु क्रियासंक्रमणम् इत्युक्ते आत्मसिद्धिः परसंस्करणञ्च। अत्र शिक्षकाणां क्रियाविषये,गुणविषये कृत्याकृत्यविषये च निर्दिष्टम्। शिक्षणाधिगमप्रक्रियायां पक्षत्रयस्य समन्वयः भवति। पूर्वपक्षः आचार्यः उत्तरपक्षः अन्तेवासी (शिष्यः) विद्या सन्धिः। अभिप्रायोऽयं काव्यप्रकाशविश्वेश्वरीटीकायां संकेतग्रहप्रसङ्गेउत्तमवृद्धः (शिक्षकः) मध्यमवृद्धः क्रियासम्पादकः,शिष्यरूपेण अधिगमकर्ता च।[6] त्रिषुमध्ये जायमानः व्यवहारः पक्षत्रयस्य उदाहरणम्। शिक्षणाधिगमस्य मुख्योद्देश्यं ज्ञानस्य सर्जनं दानं ग्रहणं वा। एतदर्थं श्रीमद्भगवद्गीतायां ज्ञानं (Knowledge),ज्ञेयं (known) परिज्ञाता (Knower) इतिरूपेण विवेचितं वर्तते। व्याकरणशास्त्रे पदप्रक्रियायां सुप्तिङन्तंपदम् इति सूत्रं भवति। तिङ् क्रियारूपम्। शिक्षणाधिगमः भारते पुराकालादाराभ्य सम्प्रत्यपि क्रियारूपे,व्यापाररूपे, व्यवहाररूपे वा स्वीक्रियते। क्रियायाः अस्याः सम्पादनाय आचार्यस्य, विद्यार्थिनःज्ञानं च अपेक्षितम्।


अधिगमविषये महाभारते प्रसिद्धानि स्रोतांसि चत्वारि परिगणितानि- प्रथमः आचार्यः, मेधा, सहपाठिनः अवसरः कालो वा (Teacher] Intelligence, peers and opportunities or time)।[7] आचार्यः औपचारिकशिक्षणे अनौपचारिकशिक्षणे अनुभवश्रेष्ठः जयेष्ठोवा। विषयेऽस्मिन् श्रीमद्भगवद् गीतायां लिखितं वर्तते- यद्यदाचरति श्रेष्ठः .........।[8] इत्युक्ते अधिगन्तुम् आचार्यस्य, श्रेष्ठजनस्य, अनुभूतस्य ज्ञानवृद्धस्य स्थानं महत्त्वपूर्णम्। यक्ष-युधिष्ठिरसंवादे- 'महाजनो येन गतः स पन्थाः।'[9] इत्यत्रापि अनुभवद्वारा अधिगमोपरि बलं सूच्यते। अपरं तु मेधया स्वप्रज्ञया वा अधिगम उभयो परिप्रेक्ष्ये सम्भवति। अन्वेषणद्वारा अधिगमः (learning by discovery or Insight learning) पाश्चात्त्यवैज्ञानिकाः (सूझ का सिद्धान्त Insight Theory of learning) रूपेण स्वीकुर्वन्ति, सब्रह्मचारिभिः अनेन (peer learning or cooperative learning) अन्योन्याश्रयः सहयोगात्मको वा अधिगमः। कालक्रमेण इत्यस्याभिप्रायः समयेन परिस्थित्यानुरूपेण (Nead or situational Learning) अधिगमः। एतस्मिन् विषये 'व्यवहारतश्च'[10] 'अवापोद्वाप'[11] इत्युक्ते लोके कर्मकारस्य समीपस्थजनाः अवलोक्य तत् तत् कर्मणि प्रवृक्तिं आप्नुयुः। तथैव वैदिक- (शास्त्रीय) पक्षेऽपि अधिगमस्य (करणम्) साधनम्। व्याकरणशास्त्रे एताः सर्वाः क्रियाःसम्पादनाय क्त्वा- प्रत्ययस्य उपयोगः क्रियते। अस्य प्रत्ययस्य प्रयोगः पूर्वसंपादितक्रियाऽर्थं भवति। क्रियायाः सम्पादनं परिणामप्राप्तये भवति। अत्रापि अधिगन्तुम् एतस्य प्रत्ययस्य उपयोगः चमत्कारकारी प्रतीयते। अभिप्रायः वयम् कथम्अधिगच्छामः? एतदर्थं 'क्त्वा' प्रत्ययस्य प्रयोगं कुर्मः। यथा-




अधिगमविषये महर्षिवाल्मीकिना प्राप्तये लब्धये वा अर्थे प्रयोगः विहितः 'तवाधिगमशासनात्'[12] । अधिगमोपरान्ते मनसि सुखानुभूति भवति। अभिप्रायः अधिगमं प्रति अपेक्षाभावः आवश्यकता आत्मतुष्टिरपि कारणं मन्यते। यदा अपेक्षाया आवश्यकतायाश्च पूर्तिः भवति तदैव आत्मतुष्टिः परिकल्प्यते। अपेक्षाया आवश्यकतायाश्च पूर्तये यत्नः करणीयः भवति। यतःक्त्वा- प्रत्ययस्य प्रयोगः यत्नविधेयकत्वं स्वीकरणीयः।

ज्ञानप्राप्तये आवश्यकता इत्युक्ते जिज्ञासा आकांक्षा वा अपेक्षिता भवति। यस्य पूर्तये प्रयत्नः, शिष्यत्वं[13], विनयत्वं निर्दुष्टत्वं परिप्रश्नं सेवाभावः चापेक्षितः भवति एतत् सर्वं श्रीमद्भगवद्गीतायामपि लिखितं वर्तते[14] , अन्यत्रापि। अद्यतनीयाः शिक्षाशास्त्रिणोऽपि कृत्वाधिगमःअनुभूयाधिगमः इत्यत्र (learning by doing & Learning by Experiences) बलं प्रयच्छन्ति। येन अधिगमः दृढः स्थायी च भवेत्। सरलरूपेण अधिगन्तुं न्यायशास्त्रे सूत्रं वर्तते।' प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्क- निर्णयवाद- जल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानात् निःश्रेयसाधिगमः।[15] मीमांसायामपि-विषयः,संशयः,पूर्वपक्षः, उत्तरपक्षः, समन्वयः इति पञ्चविषयाः आवश्यकाः विषयावबोधनाय।[16] एतानि साधनान्यपि अधिगमम्प्रति आवश्यकानि भवन्ति। एतैः साधनैः अधिगमः सम्भवति यथा पूर्वमुक्तम् अधिगमः शिक्षणं विना न सम्भवति। शिक्षणाधिगमे सहैव चल्यमानेक्रिये स्तः। यतोहि अधिगन्तुम् अधिगमकर्तृणां सक्रियतायाः प्राथम्यं भवति तदैतत् शिक्षणे शिक्षकाणाम्। अतः अधिगतःक्त्वा-प्रत्ययस्य प्रयोगः। अतो प्राथम्यं शिक्षणाय बोधनाय वा णिच् प्रत्ययेन सह क्त्वा-प्रयोगः।

किं नाम शिक्षणम्? प्रश्नस्यास्य उत्तरविषये आचार्यःशङ्करः प्रतिपादयति विभिन्नप्रवृत्तिप्रयोजकेष्टसाधनताज्ञानाख्यशिक्षायाः प्रयत्नः शिक्षणं कथ्यते।[17] सम्यक् रीत्या शिक्षणाय बोधनायवा मीमांसायामपि-विषयः संशयः,पूर्वपक्षः,उत्तरपक्षः समन्वयः इति पञ्चावयवाः आवश्यकाः कथ्यति। शाब्दिकैः शिक्षणाय शणिच्' प्रत्ययस्य प्रयोगविधानं विहितम्। यथा -




शेषभागःसप्तमपुटे

# सरलमानकसंस्कृततन्त्रम्

-डॉ. मञ्जूषा चन्ने ठेमदेवः
केन्द्रीयसंस्कृतविश्वविद्यालयः,
साहित्यविभागः,
एकलव्यपरिसरः, अगरतला, त्रिपुरा

'विश्वभाषा संस्कृतम्', 'सरलभाषा संस्कृतम्', 'शास्त्रभाषा संस्कृतम्' 'मधुरभाषा संस्कृतम्' च ईदृशानि संस्कृतभाषासम्बद्धानि घोषवाक्यानि बहुधास्माकं कर्णकुहरं प्रविशन्ति। तथैव इदमपि अवलोक्यते यज्जगति प्रायः कापि संस्था संस्कृतध्येयवाक्यानां प्रयोगोऽपि स्वीयप्रतिष्ठामेव मनुत इति।

यथा-भारतसर्वकारस्य 'सत्यमेव जयते' इति घोषवाक्यमस्ति। भारतीयसर्वोच्चन्यायालयः स्वीयकर्मपरिचयं 'यतो धर्मस्ततो जयः' इति बोध वाक्येन कारयति। प्रसारभारती तु 'सत्यं शिवं सुन्दरम्' इति ध्येयवाक्यं प्रयुङ्क्ते। 'सेवा अस्माकं धर्मः' इति घोषयित्वा भारतीयभूसेना सन्ततं स्वकार्यं विदधाति। भारतीयजीवनविमानिगमोऽपि 'योगक्षेमं वहाम्यहम्' इति उद्घोष्य वयं युष्माकं जीवननिर्वहणकर्तार इति संस्मारयति। भारतीयपत्राचारविभागेऽपि 'अहर्निशं सेवामहे' इति ध्येयवाक्यं फलके दृश्यते। विश्वहिन्दूपरिषद् 'धर्मो रक्षति रक्षितः' इत्यनेन धर्मपालकाः वयमिति बोध यति। इत्थं प्रायः सर्वासामपि संस्थानां ध्येयवाक्यानि घोषवाक्यानि वा संस्कृतभाषया एव दरीदृश्यन्ते।

अहो बत महच्चित्रमिदं यत् समाजे पत्रकाराः, प्रादेशिकभाषालेखकाः, वक्तारः, व्याख्यानकर्तारः तथा च नेतारोऽपि स्वीयभाषणे लेखने वा संस्कृतसुभाषितानि प्रयुज्य न केवलं भाषाप्रभावं जनयन्ति अपि तु श्रोतघ्न् मोहयन्तीति। अनेन निखिले विश्वे संस्कृतभाषाविषयकोऽभिमानः भाषासौन्दर्यवध 'नाय श्रवणसौभाग्याय च परिलक्ष्यते। तस्मात् जीवने लाभप्रदायकानि तानि वाक्यानि क्षणकालं स्मृत्वा विस्मरणपथं गच्छन्ति। यतः संस्कृतभाषाव्यवहारः न समाजे न वा कार्यालये श्रूयते। आशयोऽयं यत् यावत् संस्कृतभाषा मुखे मुखे न भविष्यति तावदिमानि वाक्यानि नान्वर्थकानि न वा सार्थकानीति।

समाजे विचाराणामादानप्रदानसाधनं संस्कृतभाषा भविष्यति चेदमीषां वाक्यानां सार्थकत्वं लीलया सम्भवेत्। अन्यच्च संस्कृतवाङ्मयेऽस्माकं प्राचीना ज्ञानपरम्परा निहिता अस्ति। तस्याः रक्षणाय अपि न केवलं संस्कृतभाषाज्ञानमावश्यकमपि तु सम्भाषणमपि अनिवार्यं वर्तते। अयमपि समेषामनुभवोऽस्ति यत् संस्कृते विद्यमानानि सुभाषितानि काले काले स्थाने स्थाने चाखिले विश्वे मानवानां मार्गदर्शकत्वेन संतिष्ठन्ते। किन्तु तेषामर्थबोध ाय प्रादेशिकभाषायाः आश्रयः स्वीकर्तव्य भवतीति तु खेदजनकं नु। अत एव इहलोकोपकारकाणि जीवनोत्कर्षविधायकानि च सुभाषितानि सहजतया बोद्धुमस्माभिः सरलमानकसंस्कृतमनुसर्तव्यम्।

**किं नाम सरलमानकसंस्कृतम्।।**

अद्यत्वे निरन्तरं 'सरलमानकसंस्कृतम्' इति पदं वारं वारं श्रुतिगोचरं भवति। अत्र हि सरलञ्च मानकञ्चेति इति द्वन्द्वसमासेन सरलमानकमिति सामासिकपदं समुद्भवति। तेन सरलेन मानकेन चान्वितं संस्कृतं सरलमानकसंस्कृतमिति।

पदेऽस्मिन् सरलमित्यस्यार्थः 'सुबोधमि'ति सर्वविदितमेव। किञ्च मानकम् इत्युक्ते व्याकरणनियमानुगुणं सरलं शुद्धञ्चेति। तादृशसाधुशब्दानां पदानां वा वाक्येषु प्रयोगः विधातव्य इति संसूचयति सरलमानकसंस्कृतमिति पदम्।

तदानीं मनसि प्रश्नः उदेति यत्किं प्राक् संस्कृतभाषा क्लिष्टा आसीत्। तस्मादधुना सरलसंस्कृतभाषा प्रयोक्तव्येति निगद्यते। नैव। न तथा। उच्यते खलु - 'सुरससुबोधा विश्वमनोज्ञा ललिताहृद्या रमणीया। अमृतवाणी संस्कृतभाषा नैव क्लिष्टा न च कठिना' इति।

एवं चेत् कीदृशी सा सरला अपि च 'सरला' इत्यनेन कीदृशः भावः स्फुटीभवति तदत्र ज्ञास्यामः।

समाजेऽस्मिन् संस्कृतेतरः संस्कतादनभिज्ञश्च जनोऽपि यां भाषामवबुध्यात् सा सरला संस्कृतभाषा। अतः 'सकलजनावगमना भाषा सरले'ति ज्ञातव्यम्। स्वाभाविकी सर्वजनसुखबोधिनी च संस्कृतभाषा दैनिकव्यवहारे प्रयोक्तव्या। यदा संस्कृतेन सहजसम्भाषणं स्यात्, संस्कृतवाक्यानां पदानां वा लीलया बोधः भवेत् तदा सा भाषाप्रयुक्तिः सरलमानकप्रवृत्तिरिति। तेन हि समाजे यादृशी व्याकरणशुद्धा भाषा लोकसंवादे प्रयुज्यमाना भवेत् सैव सरलमानकसंस्कृतभाषा।

**अद्यत्वे सरलमानकसंस्कृतभाषायाः प्रयोजनम्**

सरलमानकसंस्कृतभाषाप्रयोगस्य प्रयोजनमिदमस्ति यत्सा भाषा सामान्यजनेषु लोकप्रियतां सम्प्राप्य तेषां हृदि प्रविश्य अनायासेन दैनन्दिनव्यवहारस्य साधनं भवेदिति।

सर्वविदितमेव यत् भाषायाः रूपद्वयम्-व्यावहारिकं प्रौढञ्चेति। प्रौढा भाषा तु ग्रन्थेषूपज्यते। किञ्च व्यावहारिकी भाषा मानवसंवादक्षमा। वस्तुतः 'भाष्यते इति भाषा' इति भाषापदव्युत्पत्तिः संस्कृतस्यापि तदानीमेव सेत्स्यति यदा सा व्यवहाररूपेण स्थानमाप्नुयात्। सर्वजनसम्मतमेव यत् सर्वासु भारतीयभाषासु संस्कृतभाषा एव सुसंस्कृता वरीवर्ति नान्या इति। तत्र हि संस्कृतमिति पदमेव एषा व्याकरणसंस्कारवतीभाषा इति बोधयति। तस्याः कारणात् अपराऽपि भाषा शुद्धा चारुत्वसम्पन्ना च भूत्वा सौन्दर्यमापादयति। तस्मादेव निजभाषणे संस्कृतशब्दानादाय वक्तारोऽपि प्रभावं जनयितुं समर्थाः भवन्तीत्यतः सा सर्वासु भाषासु मूर्धन्यं भजते। किन्तु ग्रन्थनिबद्धानि पदानि प्रौढत्वं निदर्शयन्ति क्लेशभावञ्च प्रकाशयन्ति।

तथैव संस्कृतभाषा नाम प्राचीनभाषा। सा केवलं शास्त्राध्ययनाय कर्मकाण्डादिषु च उपयुज्यते। तस्मात् सा देवभाषा, न तु लोकव्यवहारयुक्ता इति समाजभावना अस्माभिः दूरीकरणीया। सर्वेषां विषयाणां प्रतिपादनाय विश्लेषणाय च संस्कृतभाषायाः सामर्थ्यं वरीवर्तीति भावः विश्वासश्च जनमनस्सु समुद्भवेत्।

वस्तुतः संस्कृतसम्भाषणाय पदानां बाहुल्यं नापेक्ष्यते इति विशेषः। कतिचन शब्दैरपि सामान्यभाषाव्यवहारः निश्चयेन शक्यः। यथा पर्वतारोही अनिवार्यवस्तून्यादाय पर्वतमारोहति लक्ष्यञ्च सम्पादयति तथा कतिपयानि अनिर्वायपदानि प्रयुज्य विवक्षुः स्वीयविचारान् प्रकाशयितुं सामर्थ्यं प्राप्नोतीति निश्चप्रचम्। तदर्थमद्यत्वे सरलमानकसंस्कृतभाषायाः अनिवार्यता अनुभूयतेऽस्माभिः। किं वा कर्तव्यमिति विचारिते सति सन्ततं संस्कृतसम्भाषणे सहज-सरल-पदप्रयोगः विधातव्यः। केन प्रकारेण तत्सर्वं शक्यं भवेत् सन्ति विषयेऽस्मिन् कतिचन तन्त्राणि। तानि सम्प्रति विविच्यन्ते।

**सरलमानकसंस्कृततन्त्राणि**

**-मातृभाषानुगुणं शब्दानां चयनम्**

परस्परसंलापाय संस्कृतभाषा प्रयुक्तव्या चेदादौ शब्दसङ्ग्रहः अपेक्ष्यते। किन्तु नास्ति तत्र किमपि काठिन्यम्। यतः सर्वभारतीयभाषासु प्रायः ७५% संस्कृतशब्दाः विलसन्ति ये च मानवस्य मुखे मुखे नरीनृत्यन्ते। अस्माभिः तत्तद्राज्ये मातृभाषायां प्रादेशिकभाषायां वा समुपलब्धाः रूढाश्च संस्कृतशब्दाः सङ्ग्रहणीयाः। तेषामेव प्रयोगः भाषणकाले कर्तव्यः। तेन हि शाब्दबोधे सौकर्यं जायते।

तथैव प्राचीनग्रन्थेषु विद्यमानाः सरलाः, सुबोधाः, प्रसिद्धाः, विख्याताः सर्वश्रुताः शब्दाः प्रयुक्तव्याः। तस्य फलमिदं यत् भाषायाः सौन्दर्यं वर्धते।

अन्यदेकं मनसि ध्यातव्यं यदनुक्षणशब्दसंस्मरणाय सततं संस्कृतवार्तालापो विधीयेत। संस्कृतव्याख्यानानि श्रूयेरन्। संस्कृतसमाचारपत्राणि नित्यं पठ्येरन्। वस्तुतः कथाग्रन्थानां गद्यपद्यात्मककाव्यानाञ्च वारं वारं पठनमावश्यकं भाषाधिकाराय। यतो हि हृदये विद्यमानाः भावाः भाषाधि काराभावे नैव प्रकाशयितुं शक्यन्ते।

**-तिङन्तेषु सुबन्तेषु च सारल्यम्**

विदितमेव यत् संस्कृतवाक्यं वक्तुं लेखितुं वा तिङन्तसुबन्तरूपज्ञानमनिवार्यमिति। तत्र हि तिङन्तरूपम् अर्थात् धातुरूपं क्रियापदरूपं वा। अपि च सुबन्तरूपं नाम शब्दरूपं विभक्तिरूपं वेति। पाणिनिपरिधौ तेषां सरलप्रयोगः कथं शक्यः अस्मिन्विषये सम्प्रति चर्चा विधास्यते।

**तिङन्तसारल्यम्** - संस्कृतव्याकरणे तिङन्तपदं त्रिधा विभज्यते। तद्यथा-परस्मैपदम्, आत्मनेपदम् उभयपदञ्चेति। तत्रापि परस्मैपदधातवः प्राचुर्येण धातुकोशे परिलक्ष्यन्ते। अतः तेषामेव प्रयोगाधिक्यं स्यात्।

**सुबन्तसारल्यम्**- सुबन्ता अर्थात् सुप्प्रत्ययान्ताः शब्दाः। ये च विभक्तिप्रत्ययान्ताः इत्यपि अभिधीयन्ते। संस्कृते इमानि विभक्तिरूपाणि प्राध ान्येन सम्भाषणे काठिन्यं जनयन्ति। ऋते कण्ठस्थीकरणात् दोषावहत्वं समुदेति तत्र। अन्यच्च इदं शब्दरूपाणां कण्ठस्थीकरणमेव प्रायः जनेषु संस्कृतविषये क्लिष्टत्वम् अनासक्तिं चोपपादयति। यतो हि शब्दानामन्तानुगुणं विभक्तिप्रत्ययान्तरूपाण्यपि भिद्यन्ते। तत्रापि कश्चिदोपायः चिन्त्यते।

संस्कृते प्रायः अकारान्तः पुल्लिङ्ग-नपुंसकलिङ्गशब्दानां तथा च आकारान्तः ईकारान्तश्च स्त्रीलिङ्गशब्दानां प्राचुर्यं दृष्टिपथमायाति। तेषामेव रूपाणि केवलमधीतव्यानि। ततोऽप्यधिकानि न। तान्याश्रित्य एव वाक्यरचना स्यात्। यदा कदाचित् इकारान्तपुल्लिङ्गपदप्रयोगः तदानीं तस्य पर्यायवाचकपुल्लिङ्गशब्दः प्रयोक्तव्यः अथवा अकारान्तत्वेन परिवर्तनं कृत्वा प्रयोगः विधातव्यः।

यथा मुनिः इत्यत्र मुनिवरः, राजा इत्यत्र महाराजः, कविः इत्यत्र कविश्रेष्ठः, बाजपेयी इत्यत्र बाजपेयीमहोदयः इति। तदा तु अकारान्तपुल्लिङ्गविभक्तिरूपाणि एव आवश्यकानि खलु। तेन दोषसम्भावना नश्यति। अन्यच्च 'युष्मत्' सर्वनामस्थाने 'भवत्' इति सुबन्तपदप्रयोगः प्रारम्भे दोषनिवारणाय कार्यः।

**वचनप्रयोगः**- प्रथितमेव यत् वचनं त्रिविधमिति। तच्च एकवचन-द्विवचन-बहुवचनमिति। तत्र हि एकवचनबहुवचनप्रयोगाणां बाहुल्यं वाक्येषु स्यात्। प्रारम्भिकस्तरे द्विवचनं बहुशः नैव प्रयोक्तव्यं क्रियापदरूपभेदात्। नो चेत् दोषसम्भावना वर्धते। ततश्च गच्छता कालेन विद्वद्भिः सह द्विवचनप्रयोगः अनुष्ठीयते चेत् तेषामवगमने न काठिन्यम्। संख्याविषये द्विवचनबोधनाय तु 'द्वय'शब्दस्य प्रयोगः क्लेशनिवारकोऽस्ति।

**संख्याविशेषः**- एकतः पञ्चयावत् संख्यावाचकपदानां स्थाने एकं, द्वयं, त्रयं चतुष्टयञ्चेति अव्ययपदानि प्रयोक्तव्यानि। यतः एकतः चतुर्यावत् संख्यासु लिङ्गभेदात् रूपभिन्नता वर्तते। किन्तु एभिः अव्ययपदप्रयोगैः एकवचनान्त-नपुंसकलिङ्ग-क्रियापदप्रयोगः दोषाभावं जनयति। परिणामस्तु संख्याविषये विना लिङ्गज्ञानं साधुप्रयोगः।

**यथा**- फलमेकं वर्तते। बालकद्वयमस्ति। भगवतः मूर्तित्रयं विद्यते। फलचतुष्टयमानयति। एवं तत्र व्यवहारसौकर्यमनुभूयते।

**लिङ्गावधानम्**-व्याकरणे लिङ्गं त्रिविधम्। स्त्रीपुंनपुंसकमिति। तेषां प्रयोगः नित्यसम्भाषणे वर्तते एव। अतः तस्य विषये ज्ञानमानिवार्यम्। परन्तु तत्र नान्यः कोऽप्युपायः। शब्दकोश एव शरणम्। के सुबन्ताः अकारान्तपुल्लिङ्गत्वं भजन्ते, के च नपुंसकलिङ्गत्वमिति अभ्यासेन एव ज्ञायते। यतः अभ्यासेन हि संसिद्धिः शक्या।

**पुरुषप्रयोगः**-व्याकरणशास्त्रे प्रथममध्यमोत्तमश्चेति पुरुषत्रयमिति सर्वविदितमेव। प्रथमोत्तमपुरुषयोस्तु अनिवार्यता भाषणे दरीदृश्यते। तत्र हि युष्मच्छब्दस्य स्थाने भवच्छब्दस्य प्रयोगात् मध्यमपुरुषं विनापि व्यवहारः सिध्यति। यतो हि भवद्योगे न मध्यमपुरुषः। एवं मध्यमपुरुषप्रयोगः प्रारम्भिकस्तरे परिहर्तुं शक्यः क्रियापदरूपभेदात्।

**वाच्यम्**-त्रिप्रकारकं वाच्यं वाक्ये प्रयोक्तुं शक्यते। कर्तृवाच्य-कर्मवाच्य-भाववाच्यं चेति। तत्रापि कर्तृवाच्यस्य प्राचुर्यं प्रयोगे स्यात्। अनिवार्यतया कतिचन कर्मवाच्यपदानां विनियोगः सारल्यं साधयति।

लकारः-दशलकारेषु लट्-लङ्-लृट्-लोट्-इति चतुर्णामेव प्रयोगोऽपि एकं तन्त्रम्। मध्यमपुरुषाभावे तु लट्लकारे (वर्तमाने) ति-अन्ति, मि - मः इति चत्वारिरूपाणि पर्याप्तानि। लृट्लकारे इत्युक्ते भविष्यत्काले विद्यमानरूपाणि तु वर्तमानरूपसादृश्यं भजन्ते तस्मात् न तत्र कोऽपि क्लेशः प्रयोगकाले। तथैव आत्मानमुद्दिश्य प्रार्थना आज्ञा वा न सम्भवतीत्यतः लोट्लकारस्य उत्तमपुरुषरूपाणि प्राथमिकस्तरे नैवापेक्ष्यन्ते। तेन हि लोटि तु प्रथमपुरुषस्य रूपद्वयमेव। भूते लङि अडागमक्लेशोऽस्ति प्रयोगकाले सोपसर्गधातुषु। अतः लङ्लकारस्य स्थाने भूतार्थप्रतिपादनाय क्त-क्तवतुप्रत्ययान्तकृदन्तरूपाणि प्रयोक्तव्यानि। यथा कृतवान्-कृतवती, गतवान्-गतवती, दत्तवान्-दत्तवती इत्यादीनि।

इत्थं वर्तमाने चत्वारि, भविष्यत्काले चत्वारि, प्रार्थनादिषु द्वयमिति दशरूपाणि एकस्य क्रियापदस्य भवन्ति। तेषां स्मरणे न कोऽपि क्लेशः।

**अव्ययप्रयोगः**- यत्र यत्र शक्यः तत्र तत्र अव्ययप्रयोगः करणीयः। यथा - पञ्चम्यर्थे 'तसिल'-प्रत्ययान्तानि अव्ययपदानि प्रयोक्तुं शक्यानि। यतो हि तत्र लिङ्गं प्राधान्यं न भजते तस्मात् विभक्तिरूपस्मरणं नैव अपेक्ष्यते। त्रिष्वपि लिङ्गेषु समानरूपम्। अनेन विभक्तिरूपसंस्मरणक्लेशपरिहारः सम्भवति। यथा - देवालयतः, महिलातः, मन्दिरतः इति।

तथैव कतिपयानि चतुर्थीविभक्तिरूपाणि बुद्धौ संस्थापयितुं क्लेशः। किन्तु षष्ठीरूपाणि तत्क्षणमेव स्मृतिपथमायान्ति। अतः चतुर्थीविभक्त्यर्थद्योतकं 'कृते' इति अव्ययपदं षष्ठीविभक्तिरूपेण सह संयोज्य प्रयोगः विधातव्यः। किन्तु अवधेयांशोऽयं यत् यत्र यत्र चतुर्थी तत्र तत्र 'कृते' पदप्रयोगः इति न। सामान्यतः दानार्थे तस्य प्रयोगः करणीयः।

**लघुवाक्यप्रयोगः**-प्रादेशिकभाषासु वयं दीर्घाण्यपि वाक्यानि लीलया प्रयुञ्ज्महे। किन्तु संस्कृतभाषया तादृशानि एव वाक्यानि प्रयोक्तव्यानि चेत् महद् कौशलम् अभ्यासः चापेक्ष्यते। तयोः अभावे लघु लघु वाक्यनिबन्ध नम् एव वरम्। तस्मादेव एकैकं पदं पृथक्कृत्य उच्यते चेत् न कदापि वाक्यरचनायां काठिन्यं न वा अर्थबोधे बाधाजननम् ।

**विभज्यप्रयोगः**-संस्कृतव्याकरणे भूयिष्ठाः धातवस्सन्ति। तेषां सर्वेषां स्मरणं यथाकालं तु असम्भवम्। परन्तु सा समस्या विभज्यपदप्रयोगेन परिहर्तुं शक्या। यतः 'करोति' इत्यस्य योगतः अनन्तक्रियापदानि स्रष्टुं शक्यानि। अनेन क्रियापदरूपस्मरणक्लेशः, गणक्लेशः आत्मनेपदप्रयोगक्लेशश्च निवारितो भवति। 'यत्र क्लेशः तत्र विभागः' इति सूत्रं परिपाल्यते चेत् भाषादोषनिवारणं स्यात्। यथा-यतते-यत्नं करोति। शेते-शयनं करोति।

लघु लघु वाक्यानि निर्मातुं एकैकं पदं पृथक्कृत्य वक्तव्यम्। तेन हि अर्थबोधे काठिन्याभावः दृश्यते। अपि च क्रियापदरूपाणि दोषभावं न प्राप्नुवन्ति।

**भाषाशैली**-असमस्तपदानां प्रयोगः सदा सारल्याय। दीर्घसमासाः तु अर्थावगमने क्लेशं जनयन्ति। तेन हि वार्तालापकाले समासबाहुल्येन सह जटिलपदप्रयोगः निवारणीयः। अल्पसमासयुक्तानि अथवा समाससन्धिरहितानि लघु लघु वाक्यानि प्रयुक्तव्यानि। यत्र अनायासेन सन्धिसमासादयः भवेयुः तान्येव पदानि अस्माभिः स्वीकरणीयानि।

**यथा**-तथापि, नैव कोऽपि इत्यादिषु सन्धिः। देवालयः, ग्रन्थपरिशीलनम् इत्यादिषु समासः।

इदमपि अवधेयं यत् संस्कृते कदाचिदेकमेव पदं नानार्थान् प्रकाशयति। यथा -'हरिः' इति पदं सूर्यः, कपिः सिंहः चेति अनेकार्थबोधकमस्ति। क्वचित्तु एकस्मिन्नर्थे नानाविधशब्दाः विलोक्यन्ते। तादृशस्थितौ एकस्मिन्नर्थे एक एव शब्दः उपयुज्यते चेत् सम्भ्रमः नैव जायते

**यथा हि** -सत्तार्थे - वर्तते, विद्यते, अस्ति इत्येतेषु 'अस्ति' इत्यस्य एव प्रयोगः कार्यः। अथवा अनेकार्थबोधकस्य एकस्य शब्दस्य कस्मिंश्चित् एकस्मिन्नर्थे प्रयोगः विधातव्यः। यथा - 'कुतः' इत्यस्य अर्थद्वयम्- कस्मात् प्रदेशात् केन कारणेन चेति। तत्र 'कस्मात् प्रदेशात्' इत्यर्थे एव तस्य प्रयोगः स्यात्।

भाषासौन्दर्यवर्धनाय भावाभिव्यञ्जनाय च सरलसुबोधसुभाषितानां श्लोकानां वा कण्ठस्थीकरणमपि सरलशिष्टवाग्व्यवहारे उपयुक्ततां भजते। यथा-

**अलसस्य कुतो विद्या, अविद्यस्य कुतो धनम्।**
**अधनस्य कुतो मित्रम्, अमित्रस्य कुतो सुखम्।।**
**उदारस्य तृणं वित्तं शूरस्य मरणं तृणम्।**
**विरक्तस्य तृणं भार्या, निःस्पृहस्य तृणं जगत्।।**

**उपसंहारः** - पाणिनिसीमायामेव सरलतासम्पादनाय भाषासाधुतादृष्ट्या अवधातव्याः केचन अंशाः निबन्धेऽस्मिन् निर्दिष्टाः। तानधिकृत्य अस्माभिः संस्कृतभाषां व्यवहारे आनेतुं प्रयासः विधेयः। उक्तं च-'प्रयत्नानामनुष्ठानं यावत्स्यात्तत्फलोदयः' इति।

**'संस्कृतं कठिनम्** - संस्कृतं क्लिष्टम्' इति समाजमनस्सु विद्यमानां भावनां वारयितुं सरलमानकसंस्कृतं निश्चयेन उत्कृष्टसाधनं भवेदित्यत्र मे दृढविश्वासः।

------

## ग्रीष्मे गेहाद्बहिर्न गच्छेर्हे बन्धो! कविराज!



-डॉ. अरविन्दकुमारतिवारी
परिकल्पकः
अमरवाणीकविपरिषदः

वह्निं वर्षति रविः प्रचण्डं पश्य सखे! कविराज!
ग्रीष्मे गेहाद्बहिर्न गच्छेर्हे बन्धो! कविराज!

वायुर्वाति न शीतो हरहरतपति रवौ भयभीतः।
सलिलं शैत्यं त्यजति सलीलं कथयति कविरभिनीतः।
त्वमसि सखे! कविरेको लोके हे बन्धो! रसराज! १
वह्निं वर्षति रविः''
प्रातःकाले रोषात्सूर्यो लभतेऽभ्युदयं नित्यम्।
चिन्तयते सर्वोऽपि जनोऽयं किं जातं दुष्कृत्यम्।
भुङ्क्ष्व कृतस्य फलं मित्रेदं सरसं भो वनराज! २
वह्निं वर्षति रविः'
छिन्धि वनानि प्रायः सद्यो व्यवसायिन्! मतिमन्द!
दूषय नदीं सरोवरमखिलं यथाभिरुचितं नन्द!
भूमिः कृषेर्विनिष्टा देशे शृणु भगवन् नटराज! ३
वह्निं वर्षति रविः'
परमाणोर्विस्फोटनमिह संसृष्टं पृथ्व्यां सर्वम्।
क्रुद्धं विश्वं कुरुते युद्धं यन्त्रैरद्य सगर्वम्।
प्रकृतिर्जगत् स्वकवलीकुरुते गुरुवर! मुहुरभिराज! ४
वह्निं वर्षति रविः'
अयं विकासो वा भवनाशो नाहं वेद्म्यरविन्दः।
गायाम्यधुना सायंकाले भ्रान्तः कविर्मिलिन्दः।
लिख संस्तवनं बोधय मूढं मनुजं पण्डितराज! ५
वह्निं वर्षति रविः'

## ग्रीष्मवर्णनम्

नीडे श्रान्तखगा गृहेषु मनुजाः छायातले हा! मृगा
मत्स्याः शान्तसरोवरेषु कवयो मूकाः क्वचिद् गह्वरे।
रे रे कोकिलकामिनि! द्रुमवने रौषि प्रिये! व्याकुले!
भानोर्वह्निशिखाश्चरन्ति परितो मन्ये दहन्त्यो भुवम्।। १
प्रातः स्नानविधौ जलं दहति मां मध्याह्नकाले ज्वलत्
स्पृष्टं तापयतीव हा कथमहो सम्पीयमानं मुहुः।
स्वेदाम्भोधिरयं प्रयाति तनुतो विद्युत्प्रकोपाद् ध्रुवं
सूर्याग्निः सरतीव तीक्ष्णमभितो ज्येष्ठे धरां निर्दहन् ।। २
लीनः पङ्कसरोवरेऽस्ति महिषो नाल्यामसौ कुक्कुरो
लब्धुं स्थानमहो दिने प्रयतते दीर्घं द्रुतं निःश्वसन्।
गोवत्सः कुरुते ध्वनिं मुहुरसौ गौः पालकं प्रेक्षते
दृष्ट्वायं रविरंशुमान् न दयते पृथ्वीं दहन् भानवैः।। ३
अङ्के बालमियं निधाय जननी संशाययन्ती शिशु-
मादित्यं बहु निन्दतीव भगवन्! मेघं प्रभो! प्रेषये। ।
ज्येष्ठत्वं भुवि दर्शयन् न हरते सूर्यः प्रचण्डान् करान्
उन्मत्ता न विभावयन्ति वचनं दीनाननेभ्यः सृतम्।। ४
कूपाः शून्यजला द्रुमा मृतफलाः श्रीपाटला निर्दला
लोकाः क्षिप्तहला बुधा गतकलाः सूर्यांशवो निर्मलाः।
सन्तप्ताः कपयो द्रुमेषु विकलाः सन्मातरो विह्वला
भानौ राजति निर्झरा न विमलाः खिन्ना जना निर्बलाः।। ५

## स्वरवाहिनि ! स्वरतन्त्रीमावह वयं बालाः स्वरवन्दनां कुर्मः ....

1. स्व-मराल इव धवलं कुर्याः ।
   जीवनं नः तमोयुतछलकपटात् ।।
   स्वरवाहिनि.......
   वयं बालाः ......
2. करग्रन्थे ! मतिग्रन्थिं मोचयेः ।
   जडतां हर तापमपाकुरु हे ! ।।
   स्वरवाहिनि ........
   वयं बालाः ..........
3. नास्ति बुद्धिर्न भक्तिर्न गेहे धनम् ।
   प्रददे केवलमिह शब्दपंकजम् ।।
   स्वरवाहिनि .........
   वयं बालाः ..........



-पंकज कुमार झा
ए.एन.एन.टावर, गृह संख्या - 2 एफ, ब्लॉक - 1, शंकर टाकिज के पीछे, बिलासी, वैद्यनाथ धाम, देवघर, झारखण्ड, 814112

## शिवस्तुतिः।। लोकगीतम्।



-डॉ निरंजन मिश्रा

शंकर किंकरता ते नैवालिंगति याचनां
त्वामर्पयति हि भावनां स्वाम्।
त्यक्त्वा दुष्टसमाजं गता क्वचिन्मृदुभावना
चित्ते नृत्यति कामना वा।।
वन्यो भूत्वा विहरति नित्यं
निगदति तथापि वन्यं वन्यम्।
वन्यानामेतादृशि लोके का स्याद्भावना
भवेत्कीदृशी कल्पना वा।।
कुत्सितकर्मणि रता कुटिलता
वचनैर्जीवति या मानवता।
तस्य भविष्यहिताय भवेदिह का किल साधना
कविकृतकाचित्कल्पना वा।।
पूज्या दासी हेया जाया
मायां व्याख्यातीह हि माया।
यस्या भेदो नास्ति भवेत्कल्पना जल्पना
वारांगना वरांगना वा।।
पापं भोज्यं पापं पानं
पापेनैव हि यत्परिधानम्।
तत्पुरतो नमिता यदि भवति सदर्जितभावना
जीवति कथं शिवार्चना वा।।

## आत्मगतम्



प्रणेताः- दयारामो गौतमः
शिक्षाशास्त्रिच्छात्रः
श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः
तथा वैदिकगणसदस्यः।

हे दैत्यारे सहचर नु कां ते स्तुतिं स्तौमि नाथ!
यावान् शब्दः कविकुलगुरौ नास्ति तावान् मदीये।।
यावन्तो+र्था अखिलजगतो भासकास्तेपि नो वै।
भावा यावन्त इह भरितास्तेप्यमी दूरतां वै।।१

याता मत्तः किमु पदमिह त्वत्कृते संयुनज्मि।
ग्रन्थान् सर्वान् विरचितवतां यादृशी मान्यतास्ति।।
तावन्ती नो कथमपि भवेद्धिक्कृतं जीवनं मे।
आयू रम्यं मदनविविधं वांच्छतीत्यत्र लोके ।।२

सर्वासक्तो+हमपि नितरां बद्धमूढोऽद्वितीयः।
ज्ञात्वा सर्वं तदपि सुरमेऽनित्यवत्यां जगत्याम्।।
भोज्यैश्चोष्यैरिह खलु निजं पातयाम्यत्र पुण्यं ।
पुण्ये धर्मे न हि मम गतिः का कथा पातकस्य।।३

मातुस्सेवाविगतकुजनःसद्गुरौ नास्ति भक्तिः।
संध्यायज्ञाद् परमविरलान्मुक्तभावः सपापम्।।
ग्रन्थादीनामपि परिचयात् सर्वथावञ्चितोहम् ।
हा धिङ्मां वै कविमुनिसतामादराद्विच्युतं भोः।।४

शून्यं भावं तदपि जनयन् मे मनस्तुष्यतीति।
ज्ञात्वा सर्वः परमसरलो द्रक्ष्यतीति श्रमेण।।
दुष्टान् शब्दान्नपि कतिविधान् ज्ञानहीनाद्युनज्मि।
तेषां दोषादपि भवतु ते दर्शनञ्चेति मत्वा।।५

दुष्टान्त्वं वै परमसरलैर्दर्शनन्त्वीहसे वै।
दातुं सत्यं सुकृतविषयाद् दुष्कृते मेऽनुरागः।।
आगच्छ त्वं झटिति भगवन् मार्गद्रष्टाहमत्र ।
पश्यामि त्वां धृतबहुविधं वेदशास्त्रं पुराणं।।६

शंखं श्रुत्वा परमविमलं सर्वसंस्कारशून्यः।
भूयान्मे भो जननमरणाभ्यां सदा वै निवृत्तिः।।
अन्ते गत्वा करुणमयतां ते व्रजामीति भावाद्।
तोष्टयेहं विकृतिनिपुणो भावमात्रैकगम्यम्।।७

## राजकीयसंस्कृतमहाविद्यालयकुलगीतम् राजकीयोऽयं महाविद्यालयो भुवि राजताम्



डॉ.शशिकान्त तिवारी 'शशिधर'

वेददर्शनशास्त्रलौकिकबोधशोधविधायकः
धर्मसंस्कृतिभव्यराशिविभाचमत्कृतिकारकः
भ्राजते पटनानगर्यां विबुधवैभवभासितः
राजकीय..........................

भारतस्य सतां मनोरथपूर्तये नितरां रतः
धर्मसद्भावादिभूषितकृत्यबोधनतां गतः
त्यागशान्तिदयार्द्रभावकलाकुशलतासारकः
राजकीय.................................

शारदाकमलाशिवाहनुमत्प्रसादविभूषितः
श्रेष्ठपूज्यवरिष्ठदिव्यविशारदादि-
समर्चितः
भव्यसद्भवनादिभूषितभक्तिभावनया युतः
राजकीय...............................

राष्ट्रगौरवसत्यपालनमातृभूमिसमर्चकः
शास्त्रशस्त्रविभाभरो बुधवन्दितः कविसर्जकः
नैजनव्यगुणैर्यशोभिरहो स्वराष्ट्रहिते श्रुतः
राजकीय............................

करिवरवदनविमलमतिसदनसरसगुणलसितभवभयविहरण!
विविधविबुधप्रियवरजनलसितसुचरणसकलगुणिबलिवरशरण!
अशरणशरणविविधसुखभवनसकलशिवकरणगिरिपतिविहरण
अमलविमलशिवसुतगणपतिवर धर शशिधरकरमयि गजवदन! ।। 01।।
जननमरणरतजनगणमन इह भवभयभरितमयि शिवसुत तव
भजननिरतमतिगतिरतियुतमिह भजति रटति गुणमिह रिपुहरण!।
भव भव मयि भव मुदितहृदय हर मम मतिजडमिह गजपतिचरण!
अमलविमलशिवसुतगणपतिवर धर शशिधरकरमयि गजवदन!।। 02।।
श्रुतिरिह कथयति गणपतिसुरवर नर इह तव नहि गतिमनुभवति
नरपतिसुरपतिधनपतिगुणिपतिरिह तव चरणशरणमिह भजति।
प्रियवर शिवमयि कुरु हि सकलमपि भवभयमपनय विबुधसुशरण
अमलविमलशिवसुतगणपतिवर! धर शशिधरकरमयि गजवदन!।।03।।
गजमुखमुखगतरमणकिरणमिह हरति सकलनरमन इह सतत-
मवतु भवतु शुभगणपतिरिह मम हरसुत इह हृदि सुविहरतु।
गिरिपतिपतिसुतगजवरमुखयुतनिजजनशिवकरहरसुतशिवज!
अमलविमलशिवसुतगणपतिवर! धर शशिधरकरमयि गजवदन!।। 04।।
विषधरशयननिरतविधिहरशिवसुरनरमुनिजनगुणिबलिशरण
जलजनयनजलनिधिशुभभवनसुकरधृतवलयमधुरतमवदन!
गरुडविहरणकुमतिजडहरणसुमतिगतिकरणभवभयविदरण!
धर शशिधरकरमयि हि कमलधर! वस हृदि मम गुरुवरहरिचरण!।।05।।
अवनिगगनजलपवनहुतवहविचरण!जगति प्रतिजनशिवकरण!
निजजनविमलहृदयजविपदमिह हरणनिरतसुकमलदलचरण!
निशिचरदलबलनिकरदलनरतमधुबलिवरसुपवनबलहरण!
धर शशिधरकरमयि हि कमलधर! वस हृदि मम गुरुवरहरिचरण!।।06।।
यदुवररघुवरशकुलिकमठकिरिकिलिनरमृगपतिलघुपुरपरशु-
धृतदशविधमुख!तव जयजयमिह भवति जगति हि धरणिधर सुखद!
कुरु मम शिवमयि!भवतु कवनमतिप्रथितमिह जगति कविवरशरण!
धर शशिधरकरमयि हि कमलधर! वस हृदि मम गुरुवरहरिचरण!।।07।।

**झेनकथा**

### १.प्रासादः वा पान्थगृहम्



अनुवादकः
-कौशलः तिवारी

एकः प्रसिद्धो झेनमहात्मा कस्यापि राज्ञः प्रासादं प्रविष्टवान् । तस्य व्यक्तित्वस्य गौरवकारणात् केनाऽपि द्वारपालेन तं निवारयितुं साहसं न कृतम् । स महात्मा तं स्थानं गतवान् यत्र राजा सिंहासने उपविष्टवान्।
राजा महात्मानं दृष्ट्वा पृष्टवान् - 'किमिच्छसि भवान् ?' 'अहम् अत्र पान्थगृहं रात्रौ वस्तुमिच्छामि' - महात्मा उक्तवान्च 'किन्तु इदं पान्थगृहं नास्ति, मम प्रासादोऽस्ति' - आश्चर्ययुक्तो राजा कथितवान्च महात्मा पृष्टवान्- 'किं भवान् वक्तुं शक्यते यद् भवतः पूर्वम् अस्य प्रासादस्य स्वामी कः आसीत्?' राजा उक्तवान् - 'मम पिता, स दिवङ्गतः'। 'तेषां पूर्वमपि?' - महात्मा पुनः पृष्टवान्च 'मम पितामहः, सोऽपि दिवङ्गतः' - राजा पुनरुक्तवान्च महात्मा उक्तवान्- ष्एतादृशं स्थानं यत्र जनाः स्वल्पकालार्थम् उषित्वा अन्यत्र गच्छन्ति, तं स्थानं पान्थगृहं न वदेत् तर्हि किं वदेत् ?'

### २.मौनस्य मन्दिरम्

निर्वाणप्राप्तः 'शोइची' झेनगुरुः श्तोफुकूश्मन्दिरे स्वशिष्यान् पाठयति स्मद्य दिवसो भवेद् रात्रिर्वा सम्पूर्णे मन्दिरपरिसरे मौनं प्रसृतम् । कुत्रापि ध्वनिर्न भवति स्म । गुरुणा मन्त्रोच्चारणं ग्रन्थानाम् अध्ययनं च प्रतिरुद्धम्द्य तस्य शिष्याः केवलं मौनसाधनामेव कृतवन्तः। शोइचीगुरुः यदा दिवङ्गतः प्रतिवेशस्य एका स्त्री मन्दिरस्य घण्टाध्वनिं मन्त्रपाठध्वनिं च श्रुत्वैव ज्ञातवती यद् गुरुर्गतः।

चतुर्थपुटस्य शेषभागः

## शिक्षणाधिगमस्य भारतीया

दर्शयित्वा, श्रावयित्वा कारयित्वादयः शब्दाः व्यवहारबोधकाः परिस्थितिप्रदायकाश्च वर्तन्ते। येन अधिगन्तारः स्वयमेव परिस्थितौ अभिप्रेरणं स्वीकृत्य अधिगमनं कर्तुं शक्नुवन्ति। अधिगमकर्तारः दृष्ट्वा-कृत्वा-श्रुत्वादिभिः अधिगमनंग्रहणं धारणञ्च कुर्वन्ति। एतदर्थं शिक्षणाधिगमनस्य परिस्थितिनिर्माणस्य दायित्वं श्रेष्ठजनानां शिक्षकाणाम् आचार्याणां वा भवति। आचार्यः (शिक्षकः) औपचारिकरूपेण माता-पिताभ्राताभगिन्यादयः अनौपचारिकरूपेण आदर्शभूतैः स्वव्यवहारैः शिक्षयन्ति। अस्माकं शास्त्रे बहुषु स्थानेषु लिखितं वर्तते। यथा - श्महाजनो येन गतः स पन्था:। 'यथा राजा तथा प्रजा' अनौपचारिकरूपे औपचारिकरूपेण शिक्षकस्य गुरोश्च व्यवहारः महत्त्वपूर्णः भवति। यस्यानुकरणं प्रायशः अधिगमकर्तृभिः क्रियते। अतः उक्ताः णिजन्तशब्दाः शिक्षकेभ्यः आचरणीयाः इति मत्वा भारतीयपरम्परायाम् आचार्यस्य दैवत्वं गुरुत्वञ्च प्रतिष्ठापितम्। प्रमाणत्वेन शब्दकल्पद्रुमस्य पद्यस्य अवलोकनम् अपेक्षितम् -

**शान्तोदात्तः कुलीनश्च विनीतः शुद्धवेशवान्**
**शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः सुबुद्धिमान्।**
**आश्रमी ध्याननिष्ठश्च मन्त्रतन्त्रविशारदः**
**निग्रहानुग्रहे शक्तो गुरुरित्यभिधीयते।।**[18]

इत्युक्ते शिक्षकेषु उक्तगुणाः यदि भवेयुः तर्हि अधिगन्तारःतान् गुणान् ग्रहीष्यन्ति। पुरा एषाव्यवस्था प्रवर्तते स्म गुरुकुलेषु आश्रमेषु च। येन भारतीयसमाजे शिक्षणप्रणाल्यां च शिक्षणाधिगमस्य स्वच्छपरम्परा संस्थापिता वर्तते। अस्यां परम्परायाम् आचार्यपाणिनिप्रभृतीनां वैयाकरणानां स्थानं प्रामुख्यं भजते। यैः प्रतिपादितस्यश्णिच्'- प्रत्ययस्य प्रयोगः शिक्षणाधिगमदृष्ट्या कृतः इति मन्यते।

निष्कर्षत्वेन वक्तुमीहे शिक्षणाधिगमस्य भारतीयपरम्परा समृद्धा प्राक्तञ्च अस्ति। इति स्वीकृत्यसम्प्रति नूतनशिक्षानीतौ (एन.ई.पी. 2020) भारतीयज्ञानपरम्परायां प्रत्येके क्षेत्रे विशिष्टं बलं प्रयच्छति। यस्य सूत्रं वेदेषु उपनिषत्सु दार्शनिकग्रन्थेषु महाकाव्येषु सम्पूर्णे भारतीयवाङ्मये प्राप्यते।यथा- न्यायसूत्रस्य,मीमांसायाः,तैतरीयोपनिषदः, रामायणस्य,महाभारतस्य (विशिष्य गीतायाः), व्याकरणशास्त्रस्य अद्यतनस्य ग्रन्थस्य (किञ्चिद्) कानिचन सूत्रोण्येवोपस्थापितान्यत्र। यानि शिक्षणाधिगमस्य औपचारिकानौपचारिकनिरौपचारिकाः प्रक्रियाः सूचयन्ति। यथा- आचार्यात्पादमादत्ते, तवाधिगमशंसनात्, आचार्यपूर्वरूपम् निःश्रेयसाधिगमः विषयसंशयः, यद्यदाचरति श्रेष्ठः, शिष्यास्तेऽहम्शाधि मां,प्रेरणार्थेणिच्-णिचश्च कृइत्यादयस्य सूत्राणामोल्लेखः कृतः मया। विशिष्य अधिगमनाय- कृदन्तक्त्वाप्रत्यययोगेन (समानकर्तृकयोः पूर्वकाले:) निर्मिताः शब्दाः यथा- दृष्ट्वा, श्रुत्वा,स्पृष्ट्वा,घ्रात्वा,कृत्वा,पीत्वा,खादित्वा,पठित्वा,स्पृष्ट्वा, लिखित्वा,क्रीडित्वा,उक्त्वा,भूत्वा,स्वादित्वा-अधिगमः। तथैव शिक्षणाय बोधनाय वा णिजन्तशब्दाः-दर्शयित्वा श्रावयित्वा, घ्रापयित्वा,भावयित्वा, स्वादयित्वा,पाठयित्वा,लेखयित्वा,कारयित्वा, (क्रीड्यित्वा) स्पर्शयित्वादयःणिच्-प्रत्ययान्तशब्दानां प्रयोगबोधनाय शिक्षणाय वा भवतीति मन्यते।

सन्दर्भग्रन्थाः

1. राष्ट्रीयशिक्षानीति 2020।
2. संस्कृत साहित्य परिचय, एन.सी.ई.आर.टी., नई दिल्ली।
3. न्यायसूत्राणि-1, संस्कृतसंवर्धनप्रतिष्ठान्, देहली-2020, प्रथमसंस्करण।
4. श्रीमद्भगवद्गीता (शाङ्करभाष्यः), गीताप्रेस, गोरखपुर।
5. श्रीमद्वाल्मीकीयरामायणम्, गीताप्रेस, गोरखपुर।
6. संस्कृतशिक्षणम्- डॉ. उदय शङ्कर झा, चौखम्बा सुरभारती प्रकाशन, वाराणसी।
7. लघुसिद्धान्त कौमुदी- पी.एस.-11-01 मुक्तस्वाध्यायपीठम्, केन्द्रीय संस्कृत विश्वविद्यालय, नई दिल्ली।
8. वैयाकरणसिद्धान्तकौमुदी (मूलमात्रम्) पुनर्मुद्रित संस्करण, चौखम्बा विद्याभवन, 1989।
9. काव्यप्रकाश, आचार्य विश्वेश्वर सिद्धान्तशिरोमणि, ज्ञानमण्डल लिमिटेड, वाराणसी।
10. निजन्तप्रकरण, 346_Book3_H_L24.pdf, NIOS.
11. https://hi.quora.com
12. https://sellessons.wordpress.com

1. तै.उ. (शिक्षावल्ली)
2. श्रीमद्भगवद्गीता 18.18
3. समानकर्तृकयोः पूर्वकाले: 3.4.21
4. णिचश्च 1.3.74
5. मालविकाग्निमित्रम् 1.16
6. काव्यप्रकाश (आचार्य विश्वेश्वर) पृ.सं. 42
7. आचार्यपूर्वरूपम् ...... । महाभारतम्
8. श्रीमद्भगवद्गीता 3.10
9. महाभारतम् वनपर्व 313.17
10. शक्तिगृहं व्याकरणोपमान ..... सिद्धपदस्यवृद्धाः। वाक्यपदीयम् (काव्यप्रकाश पृ.सं. 42)
11. तत्रैव
12. वाल्मीकीय रामायणम् 5.35.77
13. श्रीमद्भगवद्गीतायाम् 2.7
14. श्रीमद्भगवद्गीतायाम् 4.34
15. न्यायसूत्र(1/1/1)
16. विषयोविषयश्च ............।
17. वैदिकशिक्षामीमांसा पृ.सं. 17
18. शब्दकल्पद्रुम पद्य सं. 340

# भारतवर्षस्य आख्याने उपद्वीपविमर्शः

-डॉ. लक्ष्मीकान्तविमलः, नव देहली

श्रीशंकरशिक्षायतनेन वैदिकशोधसंस्थानेन अन्तर्जालीयमाध्यमेन मईमासस्य३१तमे दिनांके सायंकाले ५ वादनतः ७ वादनपर्यन्तं भारतीयेतिहासस्य इन्द्रविजयग्रन्थस्य उपद्वीपप्रसङ्गम् अधिकृत्य राष्ट्रिया संगोष्ठी समायोजिता जाता।

जवाहरलालनेहरूविश्वविद्यालयस्य संस्कृत-प्राच्यविद्याध्ययन-संस्थानस्य प्रो. सन्तोषकुमारशुक्लमहोदयः कार्यक्रमस्य अध्यक्षः आसीत्।



दिल्लीविश्वविद्यालयस्य किरोड़ीमलमहाविद्यालयस्य संस्कृतविभागस्य आचार्या प्रो. हरीशमहोदया वक्त्री आसीत्। लखनऊविश्वविद्यालयस्य संस्कृतविभागस्य सहायकाचार्यः डॉ. सत्यकेतुः, दिल्लीविश्वविद्यालय पी. जी. डी. ए. वी. महाविद्यालयस्य (सान्ध्यस्य) सहायकाचार्यः डॉ. योगेश शर्मा, कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालयस्य दर्शनविभागस्य सहायकाचार्यः डॉ. धीरजकुमारपाण्डेयः वक्तारः आसन्।

प्रो. हरीशमहोदया इन्द्रविजयग्रन्थस्य लङ्काप्रङ्गम् अङ्गीकृत्य व्याख्यानं प्रस्तुतवती। प्रसङ्गेऽस्मिन् सिंहल-लङ्काद्वीपयोः पार्थक्यस्य विवेचनमस्ति। अस्य विषयस्य द्वादशप्रमाणैः ग्रन्थकर्तारः पं. ओझामहोदयाः सिंहललङ्कयोर्मध्ये भेदं निर्धारितवन्तः। प्रथमविप्रतिपत्तौ भागवतपुराणानुसारेण सिंहलद्वीपः सप्तमः तथा लङ्का अष्टमद्वीपः अस्ति। द्वितीयविप्रतिपत्तौ लङ्का निरक्षदेशः अस्ति। अत्र अक्षांशस्य अभावः परिलक्ष्यते। सिंहलद्वीपे अक्षांशः अस्ति। तृतीयविप्रतिपत्तौ यथा उज्जयिन्यां मध्यरेखा विद्यते तथैव लङ्कायाम् अपि मध्यरेखा विद्यते। अनेन प्रमाणेन सिंहलद्वीपो भिन्नः लङ्काद्वीपः भिन्नः। तृतीयविप्रतिपत्तौ सिंहलद्वीपे न कापि अक्षांशरेखा अवलोक्यते। लङ्कायां तु उज्जयिनीसदृशी रेखा अक्षांशसंख्यातः पूर्वदेशान्तरे स्थिता अस्ति। चतुर्थविप्रतिपत्तौ लङ्का विषुवद्रेखां स्पृशति, परन्तु सिंहलद्वीपः विषुवद्रेखातः बहुदूरम् अस्ति। पञ्चमविप्रतिपत्तौ सिंहलद्वीपस्य परिणामः पञ्चत्रिंशदधिकशतक्रोशदीर्घः सार्द्धद्वाविंशत्यधिकशतक्रोशविस्तीर्णः तथा लङ्का चतुःक्रोशदीर्घो विंशत्यधिकक्रोशविस्तीर्णो अस्ति। सप्तमविप्रतिपत्तौ सिंहलद्वीपे बहवः पर्वताः सन्ति अनया युक्त्या द्वयोर्मध्ये भेदः अस्ति। अष्टमविप्रतिपत्तौ त्रिकूटपर्वते रावणविहारः असीत् अनया युक्त्या सिंहलद्वीपः लङ्का अस्ति। इयमुक्तिः न साधुःनवमविप्रतिपत्तौ यूनानीग्रन्थे सिंहलद्वीपस्य 'टापरोवेन। इति शब्दवद् 'टापु रावणः' इति मत्वा सिंहलद्वीपस्य लङ्का नास्ति। दशमविप्रतिपत्तौ सेतुबन्ध रामेश्वरात् सिंहलद्वीपपर्यन्तं भग्नावशेषरूपेण पर्वतशृङ्खला अधुना परिलक्ष्यते। अयं विचारः न समीचीनः, रामः समुद्रे बन्धनं कृतवान्, तद्बन्धनं नष्टम्एकादशविप्रतिपत्तौ आग्नीध नामकः कश्चित् राजा आसीत् । स भारतवर्षं नवधा विभज्य नवपुत्राय महीं दत्तवान्। तेषु नवद्वीपेषु कुमारिकाद्वीपः अधुना उपलभ्यते। अन्ये सर्वे समुद्रजले निमग्नाः । द्वादशविप्रतिपत्तौ षट् प्रमाणानि सन्ति।

डॉ. सत्यकेतुः उपद्वीपप्रसङ्गम् आधारीकृत्य स्वव्याख्यानम् अकरोत्, यत् भागवतमहापुराणे जम्बूद्वीपस्य अष्टधा विभागः कृतो विद्यते तद्यथा- स्वर्णप्रस्थः, शुक्लः, आवर्तनः, नारमणकः, मन्दरहरिणः, पाञ्चजन्यः, सिंहलः लङ्का च । अत्र सप्तमस्थाने सिंहलः अष्टमस्थाने लङ्का अस्ति।

डॉ. योगेश शर्मा भारतीयभाषाप्रसङ्गं स्वीकृत्य व्याख्यानं कृतवान तेनोक्तम् यत् भारतवर्षे त्रिधा भाषा आसीत्। छन्दोभाषा प्रथमा, द्वितीया संस्कृतभाषा तृतीया नागरी भाषा । इन्द्रविजयग्रन्थे वर्णनम् अस्ति यत् पाणिनिकाले भारतवर्षे छन्दोभाषा दैवी भाषा ब्राह्मी नाम्नी भाषा भारती अस्ति। अस्मिन् प्रसङ्गे ग्रन्थकारेण भाषासंबन्धिनः विविधतथ्यानि उल्लिखितानि सन्ति।

डॉ. धीरजकुमारपाण्डेयः लिपिप्रसङ्गम् आधारीकृत्य व्याख्यानं कृतवान्। वेदस्य मन्त्रनिर्माणकाले लिपेः स्पष्टोद्धरणं प्राप्यते। शुक्लयजुर्वेदस्य पञ्चदशे अध्याये 'छन्दः क्षुरोभ्रजः' शब्दः समायाति। अत्र क्षुरपदेन लेखनी अस्ति तथा च भ्रजशब्दस्य अर्थःछन्दः अस्ति।

अध्यक्षीयोद्बोधने प्रो. सन्तोषकुमारशुक्लमहोदयः प्रतिपादितवन्तः यत् अस्याः संगोष्ठ्याः मुख्यविषयः आसीत् भारतवर्षस्य भौगोलिकी स्थितिः। उपद्वीपस्य लङ्काप्रसङ्गस्य भूगोलस्य विषयः। तत्र भाषा कीदृशी स्यात् लिपिः आसीत् न वा इत्यादयः विषयाः निमन्त्रिताः विद्वद्भिः सम्यक्तया प्रतिपादिताः। जम्बूद्वीपस्य नामकरणस्य क आधारः। मातृकाप्रसङ्गे पथ्यास्वस्तिः वैदिकवर्णमाला अस्ति। अत्र वर्णमालायाः संख्या भिन्ना भिन्ना अस्ति। वेदे सप्तनवतिः वर्णमालायाः वर्णाः विराजन्ते।

श्रीलालबहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालयस्य वेदविभागस्य अतिथिरूपेण सहायकाचार्येण डॉ. मधुसूदनशर्ममहोदयेन वैदिकमङ्गलाचरणेनसंगोष्ठ्याः प्रारम्भःसञ्जातः। कार्यक्रमस्य सञ्चालनं श्रीशंकरशिक्षायतनस्य वैदिकशोधसंस्थानस्य शोधाधिकारी डॉ. लक्ष्मीकान्तविमलः कृतवान् । अस्मिन् कार्यक्रमे विविधेभ्यः प्रान्तेभ्यः विश्वविद्यालस्य महाविद्यालस्य आचार्याः शोधच्छात्राः विषायानुरागिणश्च सोत्साहं भागं गृहीत्वा संगोष्ठीं सफलीचक्रुः।

# अहङ्कारस्य फलम्



- डॉ. कुमारमहापात्रः

भगवतः शिवस्य जटातः आगत्य गङ्गा सुमेरुपर्वतस्य एकविवरे प्राविशत् । किन्तु पर्वतं भित्त्वा सः आगन्तुम् असमर्था जाता। दीर्घद्वादशवर्षपर्यन्तं गङ्गा तन्मध्ये अभ्रमत् । गङ्गां न पश्यन् भगीरथः व्यस्तः अभवत् । गङ्गा तं प्रकृतकथां ज्ञापयित्वा अवदत् त्वम् इन्द्रतः ऐरावतहस्तिनं याचित्वा आनय । सः तस्य दन्ताधातेन पर्वतभग्नं करिष्यति । तदनन्तरम् अहं बहिः आगमिष्यामि।

भगीरथः इन्द्रतः ऐरावतहस्तिनम् आनयत् । ऐरावतः उक्तवान् यदि गङ्गा मम पथि स्थास्यति तर्हि अहं पथोन्मोचनं करिष्यामि। एवं विषयं कथं गङ्गामातरं वदामीति चिन्तयन् मनोदुःखेन भगीरथः प्रत्यागच्छत् । गङ्गा सर्वं ज्ञात्वा अवदत्, त्वम् ऐरावतं कथय यत् यदि सः मम त्रीन् तरङ्गान् सोढुं समर्थः भविष्यति तर्हि अहं तेन साकं स्थास्यामि।

एतच्छ्रुत्वा ऐरावतः आनन्दितः सन् आगतवान्। सः दन्तेन पर्वतं ताडयन् गङ्गायाः कृते पन्थानम् उन्मोचितवान्। गङ्गा त्रिभिः पथिभिः बहिरागच्छत्। गङ्गायाः प्रथमधातेन ऐरावतः भूमौ अपतत् द्वितीयेन च ऐरावतः मृतप्रायः अभवत्। अधुना जीवनाशां परित्यक्त्वा गङ्गामातरं सः आह्वयत् । तृतीयतरङ्गेन गङ्गा तं कूले अक्षिपत् । भयेन लज्जया अपमानेन च ऐरावतः पृष्ठं न पश्यन् स्वर्गपुरं पलायत् ।

**पाठकानां कृते सूचना**

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवन सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुल्कः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 22490200000142,
Indian Overseas Bank, Yamuna Vihar,
Delhi-110053
IFC Code- IOBA0002249**

# अखिलभारतीयदयानंदसेवाश्रमसंघस्य ४१तमस्य अष्टदिवसीयस्य वैचारिक-क्रांति-शिविरस्य उद्घाटनं जातम्



नई-देहली। आर्यसमाजस्य विश्वव्यापी संगठनस्य अंतर्गतं भारते विदेशे च सर्वत्र वैदिकधर्माणम्, संस्कृतीनां संस्काराणाञ्च निरंतर प्रचारः प्रसारः च भवतिस अस्मिन् एव क्रमे अखिलभारतीय दयानंदसेवा श्रमसंघेन 41 तमस्य अष्टदिवसीयस्य वैचारिक-क्रांति शिविरस्य उद्घाटनम् आर्यसमाजे रानीबागे संपन्नं कृतम्। अस्मिन् अवसरे दयानंदसेवा श्रमसंघस्य प्रमुखः तथा जेबीएम ग्रुप इत्यस्य अध्यक्षः श्रीसुरेंद्रकुमारआर्यस्य संघाथिकारिभिः स्वागतं कृतम्। सुरेंद्रकुमारआर्यः वैचारिक-क्रांति शिविरस्य उद्देश्यानां सफलतायाः सकारात्मकप्रभावस्य च सराहनां कुर्वन् सर्वान् पदाधिकारीणं वर्धापितवान्स विभिन्नेभ्यः राज्येभ्यः आगतेथ्यः 250 प्रतिनिधीनां कृते संबोधितवान् महोदयः सर्वान् वैदिकसंस्कृतेः राष्ट्रीयप्रेमस्य च संदेशितवान्। महोदयः उक्तवान् यत् आर्यसमाजस्य भविष्यम् उज्जवलम् अस्तिस भविष्येसति महर्षिदयानंदस्य कीर्तिः सम्पूर्णविश्वे गुंजायमाना भविष्यतिस संघस्य महामंत्री श्रीजोगिंदरखट्टरः उत्तरी-पूर्वी राज्योः संघस्य सेवाकार्याणाम् उल्लेखं कृतवान्। उल्लेखनीयः अस्ति यत् शिविरस्य समापनं भव्यदीक्षांतसमारोहञ्च1 जून दिनांके अंबेडकरइंटरनेशनलसेंटर, नईदेहल्याम् आयोजितः भविष्यतिस।






सेठश्री सूरजमल तपडिया आचार्य संस्कृत महाविद्यालय जसवंतगढ़ नागौर जयपुर तथा बीकानेर नगरे प्राचीन हस्तलिखितग्रन्थानां सर्वेक्षणं, सूचीकरणं, संरक्षणं च कुर्वन् अस्ति। पाण्डुलिपिसमन्वयकः अवदत् यत् सर्वेक्षणस्य समये ५०० तः ७०० वर्षाणि पुराणाः हस्तलिखिताः ग्रन्थाः प्राप्ताः येषां सूची रसायनानां माध्यमेन क्रियते। तेषां अत्यन्तं महत्त्वपूर्णं साहित्यम् अपि उपलभ्यते यस्मिन् एतेषु ग्रन्थेषु आयुर्वेदः, रामायणः, महाभारतः, पुराणाः, ज्योतिषः, तन्त्र-मन्त्रः, हिन्दी-साहित्यः, सन्तकथाः इत्यादयः अनेकविषयेषु साहित्यं वर्तते। अद्यापि बहवः ग्रन्थाः प्रकाशिताः सन्ति, एतेषां ग्रन्थानां रक्षणार्थं ते प्राचीननवीनपद्धतिभिः संरक्षिताः सन्ति। भारतीयसंस्कृतेः कृते एतत् अतीव महत्त्वपूर्णं कार्यम् अस्ति, यस्य श्रेयः सेठश्री तपडिया जी इत्यस्मै गच्छति, येषां माध्यमेन एतासां प्राचीनधरोहरानाम् संरक्षणाय, रक्षणाय च उपक्रमः कृतः अस्ति।

प्रथमपुटस्य शेषभागः **हिमालयः देवतात्मा अस्ति.....**

धन्यवादं कृतवान् । अकादम्याः कुलपतिः, प्रो.बनमालीबिश्बालः चन्द्रखानीपास इत्यस्य ऐतिहासिकमहत्त्वम् उक्तवान् अथच एतं केन्द्रीयसंस्कृत विश्वविद्यालयस्य कृते एकां ऐतिहासिकोपलब्धिं च उक्तवान्। प्रो. झा उक्तवान् यत् एतत् कुलपतिमहोदयस्य मार्गदर्शनेन एव समभवत्। कैलाशपर्वतादिकानां अभियानविषये अपि कुलपतिः उत्साहं वर्धितवान् , तस्यां दिशिः वयम् अग्रे गमिष्यामः।

अस्मिन्अभियाने एकः विशेष प्रतिभागी तंत्रांश -अभियन्ता , कृष्ण कुमारः, (मैसूर)कथितवान् यत् कांचन भाषाम् आधृत्य आयोजितमिदम् अभियानं स्वयम् ऐतिहासिकम् अनुपमं च अनेनैव संस्कृतमहत्त्वं स्पष्टं भवति। श्री विजेन्द्र रावः कथितवान् अनेन संस्कृत लोकप्रियता दूरस्थ क्षेत्रेष्वपि प्रसरिष्यते। अनेकैः प्रतिभागिभिः स्वमनोरम अनुभवाः प्रस्तुताः। डा पवन व्यासः अतिथीनां वाचिक स्वागतम् अकरोत्। डा सुनीता मंच संचालनं डा विजय दाधीचः धन्यवाद ज्ञापनं च अकुर्वन्।



अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी, प्रो.(डॉ.)अजितकुमारजैनः
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।